The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY: SMT. P.R. KANGLE IN
MEMORY OF HER LATE FATHER R.P. KANGLE
Date 09/10/2009

101
1916

अथसर्वानुक्रमभाष्यप्रारंभः संख्या ३५५०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशाय नमः अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीक ऋक्संख्य ऋषिदैवतछंदांस्यनुक्रमिष्यामो यथोपदेशं अथेति
मंगले प्रस्तावे वा ऋग्गंशा बाहुल्यात् ऋग्वेदः तत्राम्नाये सम्यगभ्यासयुक्ते खिलरहिते शाकल्येन दृष्टः शाकलः शाकल एव
शाकलकः तस्मिन् शाकल्यशिष्याणां पंचानां शाकलकः तत्र आदिः प्रतीकं ऋक्संख्या ऋचामेकत्वादि ऋषिर्द्रष्टा
ऋषयो नाम ज्ञाततीवनंगा गार्थवेदिनः अर्तेः सतोतेरिति ऋषिशब्दो निरुच्यते दानादिसर्वकल्याणप्रतीकपदव्याख्या आदिः
योगीप वा पथ्य देवः देवात्तल् इति स्वार्थे तल् देवतं पुनपुंसकं छंदः पापेभ्यः छादनात् तथादि छादयंति ह वा एनं छंदांसि पा
पात्कर्मणा इति श्रुतेः षष्ठीसमासगर्भो द्वंद्वसमासः सूक्तानां प्रतीकादिद्वासः शानुमिदीर्घः अनुआनुपूर्व्या परिपाट्यानुक्रमि
ष्यामः तत्र त्रिरित्युक्तेः ननु वह्वोहि शौनकाचार्यशिष्यो भगवान् कात्यायनः कथं बहुवचनं उच्यते व्याख्यायाथ बहुत्वेन बहु
मानेन वात्मनः व्याख्यात्मन्यथाशिष्या बहुत्वं च प्रयुंजते यथानिधिं समासाद्य प्रयुंजानस्तु दृश्यते वयमत्र समृत्यार्थोदे
वोस्मान् प्रसीदति एतेन सर्वं बहुवचननिर्देशाः प्रतिपादिताः यथोपदेशं शौनकोपदेशमनतिक्रमेण अथ सर्वानुक्र
मण्यारंभसंबंध अज्ञानदोषसंकीर्तनेन तदारंभं समर्थयते नह्येन ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिः अग्निहोत्रादिविश्व
सृजामयनांतं श्रुतिविहितं कल्पसूत्रेर्व्याख्यातं कर्म श्रौतं निषेकादिश्मशानांतं स्मृतिगृह्यविदितं स्मार्तं सदाचारादिक
र्मप्रशब्द आदिकर्मणि प्रसिद्धिः फलप्रदानं एतत् ज्ञानमृते अन्यस्या छंदोवश्चात् छंद एव वा एतस्मात् ज्ञानात् ऋत इति
यावत् प्रकृतत्वात् सर्वानुक्रमणीगतज्ञानं अस्मात् ज्ञानात् ऋते श्रौतस्मार्तं कर्मणां फलप्रदानं संभवापवादो नास्ति
ऋष्यादिज्ञानेन मंत्रकं तत्रापि भविष्यतः सर्वत्र तथाहि स्मर्यते अविदित्वा ऋषिछंदो दैवतं योगमेव च योऽध्यापयेज्ज
पेद्वापि पापीयञ्जायते तु सः अपि चोक्तं ऋषिछंदो दैवतानि ब्राह्मणार्थस्वरादपि अविदित्वा प्रयुंजानो मंत्रकंटक उच्य
ते अन्यत्राप्युक्तं स्वरो वर्णोक्षरं मात्रा विनियोगोर्थ एव च मंत्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति अस्य श्लोकस्यार्थः १
स्वरादियुक्तः मंत्राणां दैवतं छंदो निरुक्तं ब्राह्मणान् ऋषीन् कृतद्धितादीश्चाज्ञात्वा यजते यागकंटकाइति कंटकः पीडकः

103
1916

कंटयंति पीडयंतीति निरुक्तः अपि च नृसिंहपुराणे ऋष्यादिकपरिज्ञाय यजन्यज्ञमतंद्रितः इति उक्तं च महाभारते चत्वारि कर्मा
ण्यभयंकराणि भयं प्रयच्छंत्ययथाकृतानि मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञमिति एवं मंत्रस्य सर्वकर्मा
णः नैष्फल्यदोष उक्तः अथ विदुषः फलमाह मंत्राणां ब्राह्मणआर्षेयः छंदोदैवतविद्याजनाध्यापनाभ्यां श्रेयोधिगच्छति ब्रा
ह्मणं विधायकं स्तावकं च कर्मणः आर्षेयमृषिदर्शनं इत्यस्मानि यदृत्येवमार्षेयेति ढंडकाः अपत्यं वेदृषेर्दृष्टमंत्रदर्शनमित्य
तः अपत्यमप्यृषेर्दृष्टं खलु मंत्रस्य दर्शनं अंशापदेहेत शा ऋषिः पुत्रमंत्रविगार्हितं प्रह्लादः पुत्रमशापद्धेद वेदार्थदूषकं महा
बलमतोपत्यत्वस्य योदर्शनमतः तमुं कर्णऋषिर्मंत्रदर्शापितरं मन्यतेयतः तद्धसिद्धासः पितवद्वाच मकृतलिंगतः छंदः
गायत्र्यादि च योगाद्धि देवदेवतमिंद्रादि एषा वस्तूदितोज्ञाताः सापेक्षत्वेपेक्षत्वोपगमकत्वात्समासः मंत्राणी विहिता
नां पदार्थानामनुष्ठानकाले स्मारकत्वयामनोर्णितं याजनाध्यापनाभ्यां चयजेत्युद्गणि चिह्नौ इजिनाण्या विस्वान्वे
वुक्तिस्युद्द करणाभ्यां श्रेयः प्रशास्यस्य श्रइत्यसुनुप्रशास्यस्य श्रवः स्वपुत्रादि मोक्षांत्फलं अधिगच्छति केवलपाठाधिक्ये
न न गच्छति न लभते अथाज्ञं निंदंति एताभ्यामेव भवंतीति एताभ्यां याजनाध्यापनाभ्यां अनेनैवंविदः सर्वानुक्रमण्यज्ञस्ये
वपुनः तत्साधनभूतानां विनियोगवेदभागानां संबंधिनां ब्राह्मणादीनां ज्ञात्वा यातयामानि छंदांसि भवंति सपश्यंते
यातः प्राणो यामत्अरसोरक्षा विषयोदासिन्यं यतस्तानि यातयामानि यमेर्यड्डिशः यामतास्य रक्षिकावेदा इत्यर्थः अ
थ वा यातयामः यातयामो जीर्णभुक्तोच्छिष्टे पि चेति निघंटोक्तत्वात् जीर्णोभुक्तोच्छिष्टवांतादौ वर्तते यातयामः शब्दः
निरसत्वादि साम्यात् छंदः सु वर्तते स चानेवंवित्स्थाणुं वर्छति रक्षजातिमृछति प्राप्नोति अर्तेः शपित्वात् ऋच्छादेशः
स चानेवंवित् गर्तेन रक्तैकूपपंकशाग्निमध्ये मंडूककच्छपादिजातिषु पात्यते अध स्थाणुत्यंतिके दोषैः यद्देवा देवहेळनं अ
पश्चेरीरपसो देव्यस्यतिश्रुतेः प्रमीयते वा कदाचिन पिबेवेदोक्तायुर्भजते उक्तं हि अनभ्यासे तु वेदानामाचारस्य च व
र्जनात् आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति इति भगवत् मनुवचनात् पापीयान् भवतीति दस्युम्लेच्छादि
जातिषु इति विज्ञायते इत्येवं सामवेदार्षेयब्राह्मणविशेषेण ज्ञायते अवगम्यते सर्वमहर्षिभिः अतो महर्षयः

सर्वे वेद इति स्थिताः अधीयते कर्षयंति देहमस्तुं न भजंते सर्वानुक्रमण्यारंभः समर्थितः अथ ऋषयः नमेति शस्तावे सा
मान्यनामान ऋषयः प्रस्तूयंते अथ ऋषय इति ऋषयः शतर्चिन आद्ये मंडले आद्यमंडलस्था ऋषयः शतर्चिन इति संज्ञिताः
ऋचां शतं शतनर्चं शजदंतादिषु परमिति परनिपातः ऋक्पूरित्यकारः अनुद्रवं जस् आद्यस्य ऋषेः ऋक्शतयोगेन शतर्चि
नः सर्वेष्वधिकेपि शतोक्तिर्बाहुल्यात् उक्तंहि शतर्चिन संज्ञा विज्ञेया आद्यमंडलदर्शिनः दशर्गादीन मधुच्छंदाद्यधिकं य
दृचां शतं न तत्पाद चर्यादन्येपि विज्ञेयास्तु शतर्चिन इति अछत्राश्च त्रिर्णकेन यथा वेछत्रिणो भवति अंत्ये क्षुद्रसूक्त महासू
क्ताः नासदासीत्सूर्यं महासूक्तं परं क्षुद्रसूक्तं सूक्तदर्शित्वादंत्ये दशमे मंडले स्थिता ऋषयः क्षुद्रसूक्त महासूक्त नामानः
मध्यमेषु माध्यमाः द्वितीयादिनवमांतेषु मंडलेषु स्थिता मध्यमनामान ऋषयः मध्यस्य मध्या न्मः अथवा चरणे अथ
परिभाषते कचित् विद्यात् कुत्रचित् ऋषेर्गोत्रानुक्तौ तमांगिरसं विद्यात् सर्वानुक्रमणि जिज्ञासुरधिगच्छेत् अह्मर्षिमिति
अश्वमेधनरंनपुरुमी[?]हादिराजर्षिनामसु माभूत् अस्मिमिति उर्वश्यादिनामसु माभूत् कचिदविशेषितमिति पूर्वत्रप
रत्र च विशिष्टिस्मिन् स एव सः ऋषभस्तो वैश्वामित्रो वितिपरत्र दर्शनात् वैश्वामित्रत्वं कथं विशेषितं कथनादिना न इति
कथादिना गाथिऋषेः कौशिकत्वं कथया यथा अविशेषितमनुपपादितं अनुक्तगोत्रत्वेपि नारायणस्य गोत्रत्वं नास्ति
यथोपदेशामिति संबंधात् उपदेशेषु वानुपलब्धेर्गोत्रस्य अथामृषिरित्याह यस्य वाक्यं सः ऋषिः उक्तंच ऋषिर्दर्शनात्
इति यातेनोच्यते सा देवता तेन वाक्येन प्रतिपाद्यं यद्वस्तु सा देवता अथ ऋषिछंदो देवतानां संबंधमाह अर्थेप्सवः धा
वन्तु अर्थ्यतइति अर्थः फलं अन्नपुत्रमोक्षांतं अर्थमात्माधीनं कर्तुमिच्छंतो मधुच्छंदः प्रभृतयः सवनानां ता ऋषयः देव
ताः सूक्तं ऋग्घविभागिनी छंदोभिर्गायत्र्यादिभिरुपायनभूतैस्तद्युक्तमंत्रैर्वाभ्यधावन् श्रद्धयाअगच्छन् अस्यप्रा
प्ताअयमेवोपायइति हृदसंकल्पः श्रद्धा याद्दगिर्वेदेवेभ्यः करोति ताद्दगिवास्मै देवाः कुर्वंतीति भद्रंभद्रस्यरातयः
स्तोत्रणासुनभद्रहतत् यइंद्रायसुनवामेत्याह येषामिंद्रस्ते जयंति अवस्तोमेभी रुद्रं दिषीय नमषाश्चांतं यदवंति २
देवाः यत्का मास्तेजुहुमस्तन्नोअस्तु ध्रुवासोअस्यकीरयोजनासः पूषंतववृतेवयं नसजीयते मरुतो नहन्यते न

1165
1916

हन्यतेनतीयतइत्यादिश्रुतिशतेभ्योपि समाश्रितरक्षणं देवाः कुर्वंतीति इदं तु श्रयः प्राप्तवंत इत्यर्थः देवता अभ्यधावंन्नि
ति प्रसंगाद्देवता आह तिस्र एव देवताः अग्निर्वायुः सूर्य इति क्षियंति निवसंत्यत्रेति पृथिवी क्षितिः भूमिस्वर्गयोरंतेवा
मध्ये अमूर्तत्वादनुपलंभात् अंतरीक्षांतमिक्ष्येवेत्यंतरिक्षं हृषोदरादि कादा दानादियुक्ताः नित्यतृप्ता अत्र आसत
इति द्योः स्वर्गः दिवउत सूर्यो नो दिवस्पातु पार्थिवेभ्यः तत्र यथा एकं सद्विप्रा० आकुरिति लिंगात् तिस्र एव देवताः
अग्निर्गृहपतिरितिहैक आकुरिति आदित्यश्चाक्रमयोगितया व्याहृतीः प्रस्तौति एवं व्याहृतयः प्रोक्ता व्यस्ता इत्येवसु
कक्रमा देवताः संबंधिनः प्रोक्ताः भूरादीनां आमर्थेन सुदयं समस्तानामिति वचनात् समस्तानां प्रजापतिर्देवतेति शे
षः ॐकारः सर्वदेवत्यः ओमिति शब्दः सर्वदेवतास्वाभिधायकत्वेन भवः सर्वदेवत्यः देवतानां तादर्थ्ययत् पारमेष्ठ्यो वा
ओंकारः परमेष्ठिनं वाभिधत्ते परमे उत्कृष्टे स्थाने तिष्ठतीति परमेष्ठी परमेष्ठिनिस्थीयत इति न त्वं बंधाभिधाने कर्म
णि च्यत्र ब्राह्मेवेत्येव ब्रह्मदेवत्यो वा ओंकारः देवः देवदेवत्यो वा ओंकारः आध्यात्मिकः शरीरवर्तिप्रत्यभिधानो वा
ओंकारस्त्रासंगिकं समाप्य प्रकृतमनुसरति तत्तत्स्थानाअन्यास्तद्विभूतयः बृहद्देवतायानिरुक्तशास्त्रेव्याख्येयं देव
ताकांडे पृथिव्या कांडे च पृथिव्यादिस्थानभेदेन पठ्यमानाः अन्यास्तद्विभूतयः अन्यादीनां विकृतय इत्यर्थः तथादि
आद्यं नैघंटुकं द्वितीयं नैगमं तथा तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः गोशब्दपारपर्यंतमाद्यं नैघंटुकं मतं जहेद्यु
व्यमवीसांतं नैगमं संप्रचक्षते अग्न्यादिदेवपत्न्यंतं देवताकांडमुच्यते तत्र च अग्न्यादिदेवी ऊर्जाहुत्यंतो क्षितिगंतो ग
णः वाय्वादयोत्र गाथा स्युरंतरिक्षस्थदेवताः सूर्यादिदेवपत्न्यंता द्युस्थानादेवता इति गोरादिदेवपत्न्यंतं समाम्ना
यमधीयते बृहद्देवतायामपि नैघंटुकवत् ननु च अन्याश्च देवताः संति बह्व्यः नेत्याह कर्मपृथक्त्वाद्धि पृथगभि
धानस्तुतयो भवंतीति हीति प्रसिद्धौ वृत्रवधकामाश्रितरक्षणवर्षणदहनपवनद्योतनादिव्यापारभेदात् पृथ
क्नामानः पृथक्स्तुतयो बहुरूपाश्च एता एवतिस्रो देवता भवंति तथाहि नामानि ते शतक्रतो विश्वाभिर्गीर्भि

र्वा०भा०

३

रीमहइति इंद्रीमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेति रुद्रउतुतेमहिमनःसमस्यास्मत्पूर्वेइति नतेमहित्वमनुभुवं
तीति भुवनस्यपितरंगीर्भिरिति यस्येमेहिमवंतइतिसहस्राणिसहस्रशइत्यादिश्रुतिशतेभ्यः अभिधानंनामगुणावच्छिन्नं
गुणसंकीर्तनंस्तुतिःउक्तंहि स्तुतिस्तुत्यप्रभावोक्तिःस्तोत्रमित्युसभक्तिकेति एकैववामहानात्मादेवता एकादेवतानानिस्तुः
तस्यनाममहानात्मेतिश्रूयते हितस्यनाममहद्यशइति आत्मावाइदमेकएवाग्रआसीदितिसर्वैरदेरतेर्वापिव्याप्तेर्वातेर
मतेरमेः आङ्दाङ्मेङ्माङ्मङ्भ्योपिबहुभावात्मानंनिगदेद्बुधः स्फगतौ अदभक्षणे अङ्व्याप्तौ अतसातत्यगम
ने अमगत्यादिषु रमुक्रीडायां अङ्युक्तदाङ्आङ्पूर्वकः डुदाञ्दाने मेङ्प्रणिदाने माङ्माने इत्येतेभ्योधातुभ्योमु
निनाश्रुयात् आत्मशब्दस्तुसर्वधात्वर्थसमवायःसएकः सएकइत्याह सःसूर्यइत्याचक्षतइति उक्तं त्रिकाण्डेरयंस्थ
कइतिवेदविदोवदंति एतंह्येवबह्वृचामहत्युक्थेमीमांसंतइत्यारण्यकश्रुतेः अथोन्नकर्माणमुपपादयइति सहिसर्वभू
तात्मा ससूर्यःसर्वइतिनैरुक्ताःपठंतिप्रमाणत्वेन तदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेति ऋषिणामंत्रेणकु
त्सेनचतदर्थरूपमुक्तंप्रतिपादितं पुराणे दिवाकरस्तिःसलिलपवनैःपूरयित्वात्रिलोकीमेकोभूतंपुनरपिचतत्सारमादाय
गोभिः अंतर्लीनोविभासिवसुधांतद्धिनत्त्वप्रसन्नंतत्प्राणस्त्वमिति जगतांप्राणभृत्सूर्यआत्मेति जगतांजगमस्यतस्थु
षस्थावरस्य तद्विभूतयोन्यादेवताः देवताकांडत्रयवर्तिन्यः सूर्यव्यतिरिक्तअग्निवाय्वाद्यास्तद्विभूतयइत्यर्थः तस्यसूर्य
स्यविभूतयइत्यर्थः तदप्येतदृचोक्तं तदितिवाक्योपन्यासः एवं तदर्थरूपमंत्रेवस्पष्टं कथमित्यत आह इंद्रंमित्रंवरुण
मग्निमाहुरित्यादि औपन्यत्वंमाभूदित्याहुरित्युक्तं इहतारवित्ववत्यथानारमात्मेतिस्तवर्णतां एवमर्थोप्यृचांस्पष्टइति
वेदविदोबुध्यंते सत्यंवैवागृचास्पष्टंद्रष्टारीत्यत्रैवतदभानंमहर्षिभिर्युदाहरणं तस्माद्ब्राह्मणेषुबहुशःकृतं सूत्राणिब्रा
ह्मणवत्सायणेत्वयं यथाभिदीनंत्वेकेनसर्वशब्देनत्रिभिरग्निवायुसूर्यैःकिंतु उपदेशमंत्रदृष्टनामभिःक्रमेणानुक्रमि
ष्यामः प्रायेणैंद्रमरुतःप्रायेणबाहुल्येननिपातभाजोभवंति ऐंद्रंप्रायेणानैंद्रत्वेप्यल्पइति प्रायशब्दार्थः निपातोल्पभ्या ३

गतद्यनमित्यनुक्रमणीविदः अपिहर्षयोच्छंदोमेगतउर्ध्वंछंदःशास्त्रेनेतत्सर्वंमहत्त्वनीयंभवतीति तेनआदह्यधामनि
तिमाहत्यः त्यान्तुपर्येविरोदस्यो युंजंतिब्रध्नमरुषमित्यस्येइंद्रात्मणाछंदोविनियोगःसिद्धोभवति राज्ञांचदानस्तुतयः ॥
दानस्तुतिप्रतसंबंधिनोराजानः चकारोवधारणे विभिंदोर्दानंतुशर्वेत्यादौविभिंदादीनांराजत्वंविधीयते २ अथ
छंदांसि अथेतिप्रस्तावे अनंतरंप्रस्तूयंतइत्यर्थः येषेषांछंदसामिदचतुर्दशानामान्याह गायत्र्युष्णिक् इत्यतिधृत
यइति एषांगायत्र्यादीनांशब्दानांइतरेतरयोगद्वंद्वःसंज्ञाप्रदेशा प्रथमंछंदस्त्रिपदागायत्रीत्येवमादयः अथैषा
मेवाक्षरसंख्यामाह चतुर्विंशत्यक्षरादीनिचतुरुत्तराणि चतुर्विंशत्यादिचतुरुत्तरवृध्याषट्सप्तत्यंतानिछंदांसि
भवंति चतुर्विंशानिर्गायत्री अष्टाविंशात्युष्णिक् द्वात्रिंशदनुष्टुप् षट्त्रिंशदक्षराबृहती चत्वारिंशदक्षरापंक्तिः च
तुश्चत्वारिंशदक्षरात्रिष्टुप् अष्टाचत्वारिंशदक्षराबृहती द्विपंचाशदितिजगती षट्पंचाशच्छक्करी षष्टीरितिश
करी चतुःषष्टिरष्टिः अष्टषष्टिरत्यष्टिः द्विसप्ततिर्धृतिःषट्सप्ततिरतिधृतिरित्यर्थः तत्रविशेषमाह ऊनाधिके
नैकेननिचृद्भुरिजौ एकेनाक्षरेणोनेनएषामेषांचनिचृद्गायत्री निचृदुष्णिक् निचृत्पंक्तिः निचृत्ककुम्न्यंकुशिरा
निचृज्जगत्यादिसंज्ञास्युः तथाधिकेनैकेनभुरिग्गायत्रीत्यादिरित्यर्थः त्रयोविंशतिर्निचृद्गायत्री पंचविंशतिर्भुरिग्गाय
त्रीत्यादियथा अग्निःपूर्वेभिर्ऋषिभिरितिनिचृद्गायत्री विद्वांसाविदुःइतिभुरिग्गायत्री द्वाभ्यांविराट्स्वराजौ ॥
ऊनाधिकेनेत्येव द्वाभ्यामूनाभ्यामक्षराभ्यांविराड्गायत्रीत्यादिसर्वसंज्ञास्युः तथाद्वाभ्यामधिकाक्षराभ्यांस्वरा
ड्गायत्र्याद्याइत्यर्थः द्वाविंशतिर्विराड्गायत्री षड्विंशतिःस्वराड्गायत्री विराडुष्णिग्वा यथाराजंतमध्वराणा
मितिविराड्गायत्री इंद्रजुषस्वप्रवहायाहीतिस्वराट् अनुष्टुप्सुपतितत्वात् अत्रशास्त्रेनिचृदादितिशेषेचतुष्टयस्य
क्वचिदप्यनुक्तिर्लाघवार्थः इतरथेदमिदमिति प्रतिव्युत्युक्तौ बहुवक्तव्यतयाशास्त्रंगुरुतरंस्यात् नखल्वेतद्विशे
षणचतुष्टयास्पष्टंकिंचदपिसूक्तंप्रायेणविद्यते तथास्माकमेतत् चतुष्टयंसामान्योक्तावपिसतिन्यूनाधिकाभावे

167
1916

अवश्यं ज्ञातव्यमेव अतो योग इत्यादुपदेशोक्तिः कथंचिदुपलंभाच्च तथाहि छंदोनुक्रमण्यां हिरण्यपाणिः सविता विचर्षणिरि
ति इयमुत्तमस्य सूक्तस्य नवमी जगती निचृदुच्यते तथा प्रातिशाख्ये दर्दिरेकण इत्येषा ककुम्न्यंकुशिरा निचृत् त्रयोदशा
कायस्याः सा चोर्ध्वबृहती विराट् महो यो अधीन्त्रत्नतमं मम्लि ईशानमिदं जो जनद्निच महो यस्यति अधीन्त्रेसपतिं॥
नतमं होनदुरितं मर्त्यपाथिते॰ ईशानमिंधो: अगी जनो अमृत॰ एतान्युदाहरणानि अथोनाक्षरेषु गायत्र्यादिव्यवहा
रमित्यपेपादनिर्वाहप्रतिज्ञामाह पादपूरणार्थं तु क्षेप्रसंयोगैकाक्षरीभावान्व्यूहेत् क्षेप्रसंयोगो यकारवकारसंयोगः य
ण संयोग इत्यन्ये कुनत्नत् यण्विक्षिप्रे वलवति क्षेप्रः दध्यत्रेत्यादावेकैकमात्रा अर्धमात्राकरोतीति एकः पूर्वपरयोरि
त्यधिकारे संध्यक्षरे एकाक्षरीभावः तत्रद्वे अक्षरे नैकमक्षरं क्रियत इति तान् पादपूरणार्थं व्यूहेत पृथक्कुर्यात् कथं
यकारं व्यूहेत् दिवः पृथिव्याः पर्यो जउद्भृतं प्र लोहितावरेण्यः तत्सवितुर्वरेण्यमित्यादौ वकारं व्यूहेत् इंद्रः सर्पिराकृतिः
दिवं गत्वापिबेत्यादौ रेफं व्यूहेत् अयासनहव्य॰ येयानो॰ इंद्रवाजेषु नोव इंद्रसखायो अनुसंरभध्वमिति च सवर्णदी
र्घं व्यूहेत् वदनव्रत्मावरतो वनीयान् अधाधाश्वश्च इंद्रेति च आह्नुणः व्यूहेदित्यापैकाक्षरीभावस्योदाहरणं आ
द्ये तु सप्तके पादविशेषात्संज्ञाविशेषाः तुशब्दोवधारणे चतुर्दशकं छंदः कआद्ये सप्तवर्गे गायत्र्यादि जगत्यंत एव
पादविशेषात्संज्ञाविशेषा भवंतीति नोत्तरसप्तके अतिजगत्याद्यतिधृत्यंते आद्यसप्तके पादविशेषात् संज्ञायुक्ता
क्त च इति नपुनश्चोरनीयमित्याह तानानुक्रामत एवोदाहरिष्यामः तान्पादकृत संज्ञाविशेषानेवानुक्रामंते अ
ग्निं नवमृधु छंद वैश्वामित्रो वायो वायव्यमित्यादिप्रतिसूक्तमृष्यादिप्रतिपादयंत उदाहरिष्यामः नपुनः सामान्य
गायत्र्यादिशब्दात् विराड्रूपा विराट्स्थानाश्च बहूनां अपि त्रिष्टुभ एव त्रिष्टुभश्च तु श्चत्वारिंशदक्षरत्वे प्राप्ते सति
चतुर्भिः एकैरूनां अपि हीना अपि विराड्रूपा विराट्स्थानाश्चेति त्रिष्टुबधिकारोक्ताः त्रिष्टुभ एव स्युः नवकौ वैराजत्रै
ष्टुभश्च द्वौ वा वैराजो नवकत्रैष्टुभश्च विराट्स्थाने कादशिनः त्रयो ष्टकैश्च विराड्रूपा इति एकोनचत्वारिंशदेकचत्वारिंश ४
दिति पंचमिश्च तु चिंत्यक्षरैरूनामपि अद्वंत्रिष्टुभ एवेत्यर्थः किमर्थमिदमुच्यते असत्यस्मिन्योगे ह्येकोनचत्वारिंश

169
1916

तो निचृत्पंक्तित्वं चत्वारिंशतः पंक्तित्वं एकचत्वारिंशतो भुरिक्पंक्तित्वं च स्यात् इत्युद्देशः इतिशब्दः प्रकारे उद्देशः संक्षेपः पूर्वोक्त
प्रकारो बहूनेष्वपि तन्त्रदधिकारात् तदात्मकः सप्तछंदः स गायत्र्यादिषु भिमत इत्यर्थः तेन त्रयः सप्तकाः पादनिचृदित्येव विं
शत्यक्षरा गायत्री सेवमध्यमः षट्कश्चेदतिनिचृत् इति चतुर्विंशत्यक्षरा गायत्री त्येवेत्यादि सिद्धं भवति समामनंति न
वा एकेनाक्षरेण छंदांसि वियंति न द्वाभ्यामिति न त्वेकस्मादक्षरादिराबध्यंतीति चेत् त्रवियंतीति अन्यत्वं न गच्छंतीत्यर्थः
इकयोरुपलक्षणत्वात् बहूनेष्वपि भवति तत्र आद्यसप्तके गायत्र्यादि जगत्यंते वक्ष्यमाणं वेदितव्यं अस्य चानंतरसू
त्रप्रयोजनाभावात् अनादेशेष्टाक्षरा इत्यादि पूर्वसप्तसप्तक इति वक्तुं तत्रोपयोगः तेनातिजगत्याद्यतिधृत्यंते यथाध्य
यनं पादाक्षरसंख्याव्यवस्थितिसिद्धं व्यवहारलाघवाय संज्ञां करोति दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागताइ
ति संज्ञा एवनोत्तरकपादानामिति शेषः अक्षरशब्दः प्रत्येकं संबंधः दशाक्षरस्य पादस्य संज्ञा वैराज इति एकादशाक्षर
स्य त्रैष्टुभ इति द्वादशाक्षरस्य जागत इति वैराजादि प्रवेशः नवकौ वैराजत्रैष्टुभश्च त्रिजागता ध्व ह्रहत्येवमादयः श्रूयं
ते पिंगले नापि स्वयमर्थो महात्मना विराजो दिशः त्रिष्टुभोरुद्राः जगत्या आदित्या इति दशाक्षरा विराट् एकादशाक्षरा
त्रिष्टुप् द्वादशाक्षरा जगती श्रुतिरपि पादाभिप्रायेण वा अनादेशेष्टाक्षराः पादाः अक्षरसंख्यानुक्तो पादो अष्टाक्ष
रो भवति पूर्वसप्तके तेनेति ध गायत्र्यादौ त्रिष्टुक्केत्यादि सिद्धं चतुःपदाश्च तत्र अनादेशेत्येव आद्यसप्तके तुक्तपा
दसंख्या अक्षरचतुर्भिः पादैर्युक्ता भवंति तेन तृतीयमनुष्टुबित्यत्र चतुःपादत्वं सूचो भवति चतुःपदा इति चत्वारः पादा
अस्या इति बहुव्रीहौ पादस्य लोपो हस्त्यादिभ्यः इत्यंतलोपे पादी न्यतरस्यामिति टाप् ङीति अधिकृते पादः पच्चर्च इ
त्यत्राह्नुणः आदितः सप्तछंदांसि पादविशेषात्संज्ञान्विशेषान्विविच्य दर्शयितुमुपक्रमते ३ प्रथमश्छंदस्त्रिपदा
गायत्री चतुर्दश छंदसामादिभूतं गीतासु चास्वयं साक्षाद्भगवता गायत्री छंदसामहमित्युक्ता प्रधानभूतं च गायत्र
त्र्यण्वत् गायत्रीतिनिरुक्तनाम छंदस्त्रिपदा षडत्रयुक्ता त्रित्वचतुष्टयनिवृत्त्यर्थं पादाश्च त्रयोष्टाक्षरा इति उदाहरण

सर्वा०भा०
५

मग्निमीळ इत्यादिना गायत्री नि आगुष्णिहोधिकारः प्रथमं छंदस्त्वनुक्रमणे एवमुत्तरत्र द्वितीयमित्यादि सप्तममित्यंतं सक्रमश्रुतिदर्शनात्। तत्रार्यः पंचकाश्चत्वारः षट्कश्चैकः चतुर्थश्चतुष्कः काषदपंक्तिः गायत्री सैव पंचाक्षराणि परिमाणमस्याः संख्याया अतिशादंतात्। क्वच एवं चतुः षट्कौ चतुर्णां पूरणश्चतुर्थः षट्क इति कतिपय चतुरांशुक् अत्र संज्ञिनौ द्वौ पदपंक्तिः इति संज्ञा आदितश्चत्वारः पादाः पंचकाः पंचमः षळक्षरः एषा पदपंक्तिर्गायत्री अधा ह्यग्ने इयं चापदपंक्तिः आदितस्त्रयः पंचकाश्चतुर्थः श्चतुरक्षरः पंचमः षळक्षर इति अग्ने तम द्या षट्सप्तैकादशा उष्णिग्गर्भा: अत्र एका न्यूपिनः कुतो तुक् छांदसः षट्सप्त एकादशा इति त्रयः पादा यस्याः सा उष्णिग्गर्भा: नामिअभ्यानां त्रयः सप्तकाः पादनिचृत् यतो तुक् छांदसः षट्सप्त एकादशा इति त्रयः पादा यस्याः सा उष्णिग्गर्भा: तामिअभ्यानां त्रयः सप्तकाः पादनिचृत् प्रत्यायः पादाः सप्तकाः सा पादनिचृत् सुषाकहिरा ची नां मध्यमः षट्कश्चेदतिनिचृत् आद्ये पादे तृतीये च सप्तकौ मध्यमौ यदि षळक्षरा सा निवृद्गायत्री अतिनिचृदिति पुरूतमं पुरूणां ननु च षट्कसप्तकमध्ये ष्ठावतिपादनिचृदिति पैंगले श्रूयते शास्त्रेनैवं छंदः श्रूयते यथा निचृतादीनि इत्यादनिचृन्मनामानि श्रूयते उदाहृतिश्च प्रेष्ठमु प्रियाणामिति उच्यते न्यूहेनैनेहि गायत्र्या विति अत्र न स्मर्यते सावित्रीति नदित्या द्या गायत्री व्यूहना यथा दशकश्चैव यवमध्या मध्यमः इत्येव आद्ये पादे तृतीये च सप्तके मध्यमो यदि दशाक्षरः स गायत्री यवमध्या प्रकीर्तिता: मरुत्वेयी वसूनां यस्यास्तु षट्सप्ताष्टकाः सा वर्धमाना यस्याः पादाः क्रमेणास्युः षट्सप्ताष्टकास्त्रयः सा गायत्री वर्धमाना पादे रक्ष रवर्धनात् त्वमसि प्रशस्यः त्वमग्ने यज्ञानामिति च विपरीता प्रतिष्ठा अष्टकः सप्तकः षट्क इति यस्यास्तु पादा सा प्रतिष्ठोक्ता त्वमग्ने व्रतपा असि द्वौ षट्कौ सप्तकश्च ह्रसीयसी द्वौ पादौ षट्कौ अंत्यः सप्तकः पादः उदाहृतिस्तु प्रेष्ठमु प्रियाणां प्रति पादविभागेन नस्य गायत्र्य ईरिता: ४ द्वितीयमुष्णिक् त्रिपदा सा द्वादश उष्णिगिति आ अनुष्टुभोधिकारः अत्र चतुरुत्तरछंदसां प्रादूर्ध्वं त्रिस्तृती सुष्णिगिति निरुच्यते उक्तास्यपेक्षया गायत्र्याश्चतुरुत्तरत्व व्याप्त्ये पितीनोष्णिकत्वं पंकजादिवत् योगरूढिः पंकजादिवत् योगरूढित्वात् त्रिपदा पदत्रयवर्तिनी अंत्यो द्वाद

शकइत्यष्टाक्षरत्वापवादः त्रिपदेति चतुःपदत्वापवादः परिभाषिव सिद्धित्वात् अद्यावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः पइद्धसो मपानमः अथ मध्येत्युर उष्णिक् द्वादशो सैव आद्यो द्वादशाक्षरः पादअंत्यौ अष्टाक्षरौ यदि पुर उष्णिगिति प्रोक्ता सा त्वष्टत उदाहृतिः मध्यमश्चेत् ककुप् द्वादशोस्येव द्वादशाक्षरको मध्ये च एकावभितो यदि सोष्णिक् ककुबिति प्रोक्ता वयमु त्वामपूर्व्य हि त्रेष्टुभागतः श्चतुष्काः ककुम्न्यंकुशिरा एकादशाक्षरश्चाद्यो द्वितीयो द्वादशाक्षरः चतुष्कोपीति यस्याः सा ककुम्न्यंकुशिरा मता दर्दीरे क्यास्तन्नेव दर्दिरं सु ननु चतुर्थारण्यके ददीरे क्षणा इति द्वितीयपदानूनमये स्येकपदेति तत्र द्विरुच्यते न एकस्या एवक्कत्वर्थं द्विपदे कृपदात्वमित्यवरोधः एकादशिनोः परः षट्कस्तनुशिरा एकं च दशकं च दंद्वाद्वेत्यादित्वादिति निष्ठतिः एकादशाक्षरावाद्यौ तीयश्चेत्यक्षरः सा पिपीलिकमध्या क्वाहरी यस्ये यस्याः मेषा तनुशिरा प्रयाधो षउदाहृतिः मध्ये चेत्पिपीलिकमध्या षट्क इत्येव एकादशाक्षरः षट्कः पुनरेकादशाक्षरः सा पिपिलिकमध्या काहरी यस्येत्युदाहृतिः आद्यः पंचकस्त्वयो ष्टका अनुष्टुप् गर्भा आद्यः पंचाक्षरः पादस्त्रयस्त्वष्टाक्षराः परे अनुष्टुब्गर्भेति सा प्रोक्ता पितु नु स्तोषमित्यध आद्यस्त्वय इति विस्पष्टार्थं क्रमतः चतुष्पदाश्चर्वा इति परिभाषतः सिद्धेः चतुः सप्तकोष्णिगेव चतुर्भिः सप्तकैः पादैर्युक्ता ष्णुष्णिगुच्यते नदं च ओदतीनां मंसीमही त्युदाहृतिः द्वितीयमुष्णिक् त्रिपदा अंत्यो द्वादशक इत्यत्र चतुः सप्तकोष्णिगेवेत्यत्र प्रयोगत्वसूचनार्थमाहुः कथं पुनः प्रत्यक्षस्त्रिष्टुभमिषमर्चत प्रार्चत यो व्यनीरं क्षाणयदिति त्वा नुक्रम्य प्रज्ञाता अनुष्टुभः श्रीमनीति ब्राह्मणं तथा अनुष्टुभा इति सूक्तं नदं च ओदतीनामित्यस्या उष्णिक्त्वमुपपद्यते तेषु हीयमपि पठ्यते अनुष्टुप् पादसाम्येन गुणवादोयमुष्णिहरहस्यं ब्राह्मणेप्येदं सम्यगाम्नायते खलु नदं च ओदतीनामित्युष्णिगुष्णेरैः भवन्त्यनुष्टुप्पादैरिति उष्णिहो ह्या उदिष्टा: सम्यक् पादविभागतः ५ तृतीयमनुष्टुप् आ बृहत्या अनुष्टुबधिकारः चतुर्भिरष्टकैः पादैर्युक्तानुष्टुबिहोच्यते गायंति त्वा गायत्रिणः अनादेशाश्चतुःपात्त्वं पादाश्चाष्टाक्षरास्तथा पंच पंचकाः षट्कश्चैको महापदपंक्तिः पंच पंचकाक्षरा यस्याः षट्कश्चैकः षळक्षरः सोक्ता महापदपंक्तिस्त्वत्स्वादिष्ठा हीत्युदाहृतिः ॥

111
1916

सर्वा०भा०
६

आगनावष्टकश्चरुतिः आ यो ह्यो आगंता यस्यास्तृतीयोष्टाक्षरास्तथा शाकंभे नधानमित्येषा रुक्मनुष्टुबुदाहृतिः मध्ये चे
दष्टकः पिपीलिकमध्या यस्या द्वादशकस्ता यो मध्ये ष्टद्वादशाक्षराः सा पिपीलिकमध्योक्तापपर्शुप्रत्युदाहृतिः नवकयोर्म
ध्ये आगतः काविराट् चेदित्येव नवाक्षरो द्वादशकः स्यान्नवाक्षर एव चेत् इति पादास्त्रयो यस्याः काविराट् सा प्रकीर्तिता ता
विद्मा महयामहे वां नवे वेरानत्रयोदशो नष्टरूपी पादे युक्ते निशेषः नवाक्षरो दशाक्षरस्त्रयोदशाक्षरस्तथा इति त्रयो हि यत्र वै
नष्टरूपा हि सा स्मृता विपक्षामिपाक्या उनदेवान् दशकास्त्रयो विराट् दशाक्षरास्त्रयः पादा यस्याः सा विराड् भवेत् त्रयीमहस्त्व
नादेशाच्चतुःपात्वं तु मा स्म भूत् पिबा सोममिंद्र मंदतु त्वा एकादशकास्त्रयश्चेव विराट् किंतिच एकादशाक्षराः पादास्त्रयः सा
पि विराड् भवेत् दुहीयन्मित्रधितये युवाकु इत्यनुष्टुभ उद्दिष्टा अष्टौ पादप्रभावतः ६ चतुर्थं बृहती तृतीयो द्वादश चतुर्थं
बृहती आपक्ते बृहत्यधिक्रियते आदितोष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः चतुर्थोष्टाक्षरश्चेति बृहती खलु वै भवेत् अ
सि त्वा शूरनोनुमः उत्तिष्ठ ब्र० ते अष्टाक्षरश्चतुःपात्वमनादेशेन लभ्यते आद्यश्चेत्पुरस्ताद् बृहती द्वादशश्चेव द्वादशाक्ष
र आदौ चेदष्टकाश्च परे त्रयः पादा यस्या हि सा प्रोक्ता पुरस्ताद् बृहतीति वै महो यस्पतिः० स्या कुहश्रुत०द्य द्वितीयश्चेन्न्यंकुसा
रिण्युरो बृहती शास्कंधो ग्रीवी वा द्वादशकश्चेव आदितोष्टाक्षरः पादो द्वितीयो द्वादशाक्षरः पादावथाष्टकौ सो कात्रिभि
रेन च नामभिः ऋषीणां मंतभेदे हि नामभेदे तु कारणं पिंगलस्य मते चेयं महर्षेर्न्यंकुसारिणी स्कंधो ग्रीवी क्रौष्टुकेश्च
यास्कस्यो रोबृहत्यपि मतस्यपायितेमहः इंदु वां जीति रेफ स्यूंदन तृतीयोष्टाक्षरः अंतश्चेदुपरिष्टाद् बृहती द्वादशश्चेव
आदितस्त्वष्टका यस्यां त्रयो सो द्वादशाक्षरः उपरिष्टाद् बृहत्येषा ननर्म हउदाहृतिः अष्टकयोर्मध्ये दशको विष्टारबृहती
चेत्येव अष्टास्य सं नीति अष्टावशाष्टास्या दितिनिष्टतेष्टनः नस्याधिते दिलोपश्च नलोपादशिके कनियष्टाक्षरयोर्म
ध्ये द्वौ पादौ स्यातां दशाक्षरौ विष्टारबृहती सो का युवं स्या स्तं मह इति त्रिआगतोर्ध्वबृहती त्रयो द्वादशका यस्याः सा सू ६
र्ध्वबृहती मता अजीजनो अमृतमर्त्येषु दिवः पूर्णायुषं पूर्व्यं यदुक्थ्यमिति त्रयोदशिनोर्मध्ये एकः पिपीलिकमध्या य
दि स्यष्टाक्षरा मध्ये त्रयोदशकयोर्भवेत् सा पिपीलिकमध्योक्ता बृहती द्वित्रयोदशात् श्रीत्यादितो दिलोपश्च अपि

113
1916

यो वीरमं धर्मो मदे पुगाया नवकास्त्येकादशस्य षिनो विषमपदा नवाक्षरो ष्टाक्षरश्च नर्थे चैकादशाक्षरः चतुर्थोष्टाक्षरश्चेति पादा य
स्यास्तु सो च्यते बृहत्येषा तु विषमपदेति खलु बहवृचैः सनितः सुसनितरुग्रचतुर्नवका बृहत्येव चतुर्भिर्नवकैः पादैर्युक्तापि बृहतीम
ता तंत्वा वयं पितो वचोभिः चतुर्थं बृहती तृतीयो द्वादशक इत्यत्र लाघवाय चतुर्नवकश्चेति वाच्यम् प्रयोगत्वसहत्वनार्थमिदं सु
रुमचकरणमित्याहुः तथा च सूत्रं तेहि भगवता पिंगलेन पाणिन्यनुजेन शुचिन्नवकाश्चत्वार इति तत्र विदितिहि प्रयोगाल्पत्वं
सूत्रस्यतेनार्थः सूत्र्यत इति न हि बहवृचसिंहैर्नेन बृहत्या नवकीर्तिताः ७ पंचमं पंक्तिः पंचपदा आत्रेष्टुभः पंक्त्याधिकारः अत्र
पंचपदेत्युक्तिचतुःपात्वं मा स्मा भूत् अष्टाक्षराः पंचपादा यस्याः सा पंक्तिरुच्यते इंद्रो मदाय वावृधे इत्यादि सो मइन्मदे अ
थ चतुष्पदा पंक्तिरुच्यते इति शब्दैः अथेत्यधिकारे न विराड् दशकैरित्यादौ चतुर्भिः पादैरिति सिध्यं भवति असत्यस्मिन्यो
गे अनादेशात्सिध्यश्चतुःपात्वस्य पंचपदाधिकारेण बाधस्यात् विराड् दशकैः दशाक्षरैश्चतुर्भिस्तु — पादैर्युता विराड्
ऋतस्य पथि वेधा अपायि अयुजौ आगतौ सतो बृहती तृतीयाद्यौ द्वादशकौ द्वितीयांत्यौ तथाष्टकौ यस्याः सतो बृहत्युक्ता
नत्वावानित्युदाहृतिः युजौ चेद्विपरीता आगताविस्येव द्वितीयांत्यौ द्वादशकौ तृतीयाद्यौ तथाष्टकौ यस्याः सा विपरीतेति ता
स्तीका बहवो नमः यऋषः श्रावयत्सखा आद्यौ चेत्प्रस्तारपंक्तिः आगताविस्येव पादौ द्वादशकावाद्यौ ततस्त्वष्टाक्षरौ
परौ यस्याः प्रस्तारपंक्तिः सा महियावित्युदाहृतिः अंत्यौ चेदास्तारपंक्तिः आगताविस्येव आद्यावष्टाक्षरौ पादौ ततो द्वा
दशकौ परौ यस्याः सा प्रस्तारपंक्तिः स्यादाग्निं नेत्युदाहृतिः आंद्यांत्यौ चेत्संस्तारपंक्तिः द्वादशाक्षरयोर्मध्ये पादावष्टा
क्षरौ यदि यस्याः संस्तारपंक्तिः स्यात्पितुभृतो न तंतुर्भित् आयाहि वनसा सह इति द्विपदाः शंसति आयाहि वनसे मा तु क
स्तुवता सीषधामेति वृश्चुरक द्विपदास्त्कानि श्रास्लणसत्राभ्यां आयाहि संवत्त उपस्यं द्वौपदमिति सर्वानुक्रमण्यां च द्वि
पदासक्ते पितृश्चत इत्येषा पश्यते कथमिदं चतुष्पाद्दशाक्रियते उच्यते द्विर्द्विपदास्त्वृचः समामनंतीति द्वयोर्द्विपदयोरभ्य
पते एकोर्चत्वमंत्रैव वक्ष्यते न चतुष्पात्वमित्यदोषः मध्यमौ चेद्विष्टारपंक्तिः आगताविस्येव यस्यास्त्वष्टकयोर्मध्ये भवतो

द्वादशाक्षरो विष्टारपंक्तिः सा प्रोक्ता यग्नेन व श्व वो वयइति विष्टारपंक्तिरिति छादनछंदनाम्नि वैतिषद् षष्ठं वाष्टमे केनानेनैव इ
तिपंक्त्य उद्दिष्टा अष्टौ शब्दे ष्टपुष्टिदाः बह्वृचाचार्यसिंहेन कात्यायनमहर्षिणा ८ षष्ठं त्रिष्टुप् त्रैष्टुभ सप्तपदा आ जगत्या त्रिष्टुब
धिकारः त्रैष्टुभमित्याद्यखंनादेशो ष्टाक्षरनिरस्त्यर्थं पादाश्चत्वारो नादेशात् चत्वार एकादश पादा यस्याः सा प्रोक्ता त्रिष्टुबाचार्य
शिष्टैः कस्य नूनं कतमस्यामृतानां अग्नेर्वयं प्रथमस्यामृतानां द्वौ तु जागतौ यस्याः सा जागत जगती यस्याद्वादशकौ पादाव
न्यावेकादशाक्षरौ त्रिष्टुप् जागत स कस्या सो च्यते जगतीति वै यस्य त्वमायन्नसेस साधति इमं स्तोमीयस्तुतं तु जागतं त्रि
दमत्र त्रैष्टुभं त्रिष्टुप् सैव त्रिष्टुप् सूक्तस्यास्त्रिष्टुबुच्यते यथा यूपव्रस्का ये चाजिनं मा नः सूक्तं हि त्रैष्टुभं वैराजो जागतो चास्मि सा
रिणी यस्या दशाक्षरो पादो नतो द्वौ द्वादशाक्षरौ सोक्ता मितिरिणी त्रिष्टुप् यथा वा चे स्तुदाहृतिः नवकौ वैराज त्रैष्टुभश्च द्वौ वा वैराजौ
नवकं त्रैष्टुभश्च विराट्स्थाना यस्या नवाक्षरौ पादौ तृतीयो दशकस्तथा एकादशाक्षरोन्त्यश्च विराट्स्थाना तु सा मता स्वस्ति
नइंद्रो वृद्धश्रवाः यस्या दशाक्षरो वाद्यो तृतीयश्च नवाक्षरः एकादशाक्षरश्चान्त्यो विराट्स्थाना इव सापि च क्षुधा हवइंद्रमारि
षण्यः चेति प्रकारविकल्पार्थः एकादशिनस्त्रयो ष्टकश्च विराड्रूपा एकादशाक्षरा यस्याः पादास्तु त्रयः आदितः चतुर्थश्चा
ष्टकः प्रोक्ता विराड्रूपेति बह्वृचैः तुभ्यं श्चोतंत्यधिगो शचीवः स्तुतं मे मित्रावरुणा हवेमेति च एकादशिन इति च त्र्यैस्यादि
त्यादिनिः श्रुकुत्वचनस्य त्रित्वाद्यनेकविषयत्वेपि कपिंजलाधिकरणन्यायेना नादेशो चतुष्पदाश्च चेइति परिभाषया एका
दशाक्षरत्रित्वे सिद्धे त्रय इति न्यायप्राप्तानुवादः द्वादशिनस्त्रयो ष्टकं ज्योतिष्मती यस्या द्वादशिनः पादास्त्रयः काथस्ति
चाष्टकः एषा ज्योतिष्मती त्रिष्टुबं तस्य तुदाहृतिः यतो ष्टकस्ततो ज्योतिः यत इति सप्तम्यर्थे तत इति तु करणे पुरस्ताद्वा मध्ये
वोपरिष्टाद्वा यत्राष्टकः तेन सुक्तो ज्योतिः शब्दो नाम भवेत् पुरस्ताज्ज्योतिर्मध्येज्योतिरुपरिष्टाज्ज्योतिरिति एताः संज्ञाना
यं गत्वे शास्त्रे दृष्टाः तद्यथा पुरस्ताज्ज्योतिः प्रथमेन मध्येज्योतिर्मध्यमेन उपरिष्टाज्ज्योतिरंत्येन अत्र पुरस्ताज्ज्योतिरु
दाहरणं वेदांतरे इमेनइंद्रते वयं पुरुष्टुत येत्वारभ्य चरामसि प्रभूवसो अस्माकं त्वियन्मइमे तइंद्र त्वे वय मि । ति पाठात् । १

115/1916

जगत्येव मध्ये ज्योतिः यद्वा यज्ञं मनवे संमिमिक्षथुः नासिरायानं वृषणा यमेहवमिति च तृतीयेनाष्टमेकेन मध्येज्योतिर्वेदां
तरे नदस्विनामिषञारुद्र वर्तनी सरस्वती वपति वे गोतरः अस्मिन् ञागासरैः कृरांनरदधनेगवांत्वचीति उपरिष्टाज्ज्योति
रग्निनेंद्रेण वरुणेन विष्णुने त्याद्याः कृतानामहिमं विश्वदर्शतमिति च पूर्वक्रमाविवक्षयायात्वेक संज्ञार्था यमारंभः एतदेवज्ञा
पकं भवति अन्यथा उक्तक्रमवेति जपति चत्वारोष्टका जागतश्च महाबृहती चत्वारोष्टाक्षराः पादाः काप्यन्यो द्वादशाक्षरः यस्या
स्तु प्रोच्यते नाम्ना महासा बृहतीति वै अत्रापि क्रमो न विवक्षितः तेनादितो द्वादशकः अंत्यो द्वादशकः सिध्येतिन त्वादितो द्वा
दशकः नमो वाके प्रस्थिते अध्वरेनरा अंततो द्वादशकः नवानां नवतीनामितिव्यूहेन मध्ये चेद्यवमध्या जागत इत्येव आद्या
वष्टाक्षरो यस्यास्तृतीयो द्वादशाक्षरः पुनर्द्वावष्टकौ चेत्साय वमध्या प्रकीर्तिता संभातपंत्यमिनः आद्यो दशको वष्टकास्त्र
यः पंक्त्युत्तराविराट्पूर्वा वा आद्यो दशाक्षरो यस्यास्त्रयश्चाष्टाक्षराः परे पंक्त्युत्तराविराट्पूर्वा तस्या हे आत्मी इमे द्विनाम
त्वं भ्राम्यणे चउक्ति द्वे योपलंभनात् एवं द्वाभ्यां महाबिहत्यं इति त्रिष्टुभ उद्दिष्टा दशकात्यायनमहर्षिणा ९ सप्तमं जगती
जागतपदा आ प्रगाथेभ्यो जगत्यधिकार जागत्येत्यष्टाक्षरनिरस्त्यर्थं अनादेशो चतुःपात्वं यस्याः पादास्तु चत्वारो द्वादशाक्षर सं
युताः जगती नाम सा द्वौ द्वादशाक्षरौ महासतो बृहत्युक्ता सा मा त्रो त्कमोदरः आयः पश्रोभानुनेति तृतीयो द्वौ हि जागतौ
तत्र द्वौ स्वकीयौ जागतावित्यर्थः कुतः प्रकृतत्वात् जगत्याः अष्टको सप्तक षट्को दशको नवकश्च षड्वा महापंक्तिः चेति प्र
कारविकल्पे आद्यावष्टाक्षरौ यस्याः सप्तकोथ षट्कक्षरः दशाक्षरोथ नवकः सा महापंक्तिरुच्यते सूर्यविषमासजामीति
तिस्रः अष्टाक्षरगा यस्याः षट् सा महापंक्तिरेव हि अवद्के अवत्रिका उभयदिंद्ररोदसी इति तिस्रो जगत्यस्तु प्रोक्ता कात्या
यनमहर्षिणा इति छंदांसि समस्तेह व्याख्यातानि विभागशः एषु छंदोद्वययुताः संज्ञा वक्तुं विजृंभते १० अथ प्रगाथाः
अथशब्दोधिकारार्थः सूक्तसंख्यानुवर्तन इत्येतस्मात् प्रगाथा अधिक्रियंत इत्यर्थः प्रगाथ्यंते संमिलंति छंदसां छंद इ
ति प्रगाथा बृहती सतो बृहत्यौ बार्हतः प्रगाथा इत्युक्ते आदौ बृहती ततः सतो बृहतीति छंदोद्वयमिलितं विद्यात् तत्र चतु
र्थ बृहत्यां तृतीयो द्वादशकः अयुजौ जागतौ सतो बृहतीत्युक्तं अयं दश प्रगाथमित्यादौ तत्र यंता मिति बृहती त्रिवंधु

रेवांतिसनोबृहतीत्यादि बार्हतइति सौम्यादिरिति छंदसः प्रगाथेष्वित्यण् एवं ककुभादिष्वपि द्रष्टव्यं ककुप्सतोबृहत्योः काकुभः प्रगाथः
सर्वा०भा० मध्यमश्चेत्ककुबित्युक्तं महाबृहती महासतोबृहत्योर्महाबार्हतः प्रगाथ इत्येव एतेवत्सरोऽष्टका जागतश्च महाबृहती अ
ष्टिनस्त्वय स्तोत्रं द्वौ महासतोबृहत्या इत्युक्ते तन्नरपदवृध्धिछांदसी अन्यथा महाबार्हत इति हि प्राप्तेति यज्ञायज्ञावः महाबार्हत
८ बार्हतौ प्रगाथाविन्यत्र बृहद्भिरग्नइति द्वौ बृहत्याविति विपरीते विपरीतो न्तरः प्रगाथ इत्यत्र न हि तेभूरइतिद्वे अनुष्टुब्गायत्र्यौ
चानुष्टुभौ नुष्टुम्मुखात्स्त्वाइत्युक्ते अत्र शास्त्रे अनुष्टुम्मुखात्स्त्वाइत्युक्ते अनुष्टुभः प्रगाथः प्रत्येतव्यः अत्रादावनुष्टुब्गा
यत्र्याविति द्वंद्वोमाविधीति द्वंद्वेस्त्यनुष्टुब्गायत्रीस्यात् आत्वेकौ नाप्रियमेधआद्यावनुष्टुम्मुखास्त्वाश्चत्वार इति आत्वा
रथमित्यनुष्टुप् तुविशुष्मतिद्वे गायत्र्यादि अनुष्टुम्मुखात्स्त्वाइत्युक्तं इतिवचनं गायंतित्वादशानुष्टुभामित्यत्र अनुष्टुबे
का गायत्रीद्वयं वेत्याभूदिति अत्र अथ छंदांसीत्युच्यमानेषु चतुर्दश छंदः सु गायत्र्यादि जगत्यंते आद्ये सप्तके भेदौ वर्गे
उक्ते उत्तरसप्तवर्गे अतिजगत्यादि आतिधृत्यंते अक्षरसंख्येव न पादविशेषान् संज्ञाविशेषाः पादाश्चानुक्रमण्यंतेरसि
ध्याः उच्यंते प्रदा अतिजगत्यां तु त्रयोद्वादशकाः परो अष्टको वा क्करीपादैः सप्त वाष्टाक्षराश्चेते अतिशक्करीपादौ द्वावादि
तः षोडशाक्षरो जागतौ द्वावष्टकावष्ट पादाः षोडशकास्त्रयः अष्टको वात्यष्टिपादा जागतौ वाष्टकास्त्रयः जागतश्चाष्ट
कश्चाथ धृतिपादास्तु जागतौ पादास्त्रयोऽष्टकाश्चाथ चतुर्दशक एव च अष्टकश्चाप्यतिधृतौ जागतः षोडशाक्षरः त्रयोऽष्टका
जागतश्च तथैवाष्टक इत्यपि पूर्वक्रमसप्तकपादास्तु प्रसंगात्तेन ईरिताः तत्रातिजगत्याद्यतिधृत्यंतोदाहरणानि प्रदर्श्यंते अतिज
गती प्रवोमहेमतयो यंतु विष्णवे शक्करीप्रोष्वस्मैपुरोरथं अतिशक्करी साकंजातः क्रतुना साकमोजसा ववक्षिथ अष्टिः त्रिक
द्रुकेषु महिषो यवाशिरं तुविशुष्मः अत्यष्टिः अग्निं होतारं मन्ये दास्वंतं धृतिः अवर्महइंद्र दादृहि श्रुधीनः अतिधृतिः सहिशर्धो
न मारुतं तुविष्वणिः एतस्याः शाकल्यसंहितायां एतावंति चतुर्दशछंदांस्येव संतीति पुरस्ताज्ज्योतिरादि उक्तादिपंचकं नोक्तं पुरस्ता
त्स्याद्युक्तत्वं तस्य च सप्तकस्यानर्वंति रिति वेदितव्यं अनुचउक्तं मध्यमं प्रतिष्ठा कृतिप्रतिष्ठेति च महर्षिणा सूच्यते सानि मध्यमं ८
प्रतिष्ठासु च चतुः शतसुत्कृतिः चतुरश्चतुरः स्य जेदुत्कृतेः नान्याभिसंख्याभ्यः कृतिः प्रकृत्या चेति अथोत्कस्य द्वादशकस्या

117
1916

दाहरणानि प्रदर्श्यंते तत्रोक्तं नाम छंदः नूनमथेत्येकपदांते तथा हि चतुर्थारण्यके नूनमथेत्येकपदेति इत्युक्तं अग्निर्ज्योति
ज्योतिरग्निरिति द्विपदा मध्यमं अग्निर्ज्योतिः सूर्योज्योतिरिति त्रिपदा प्रतिष्ठा आग्नेयापत्नी सजूर्देवेति तत्रत्या सो मंधिवति
चतुःपदा कृत्प्रतिष्ठा पुरुतमं पुरूणां स्तोतॄणां विवाचि वाजेभिर्वाजयतामिति त्रिपदैव मध्यमः पंक्तिश्च दतिनिचृत् इत्यतिनि
चृद्गायत्री मिमां वयं ब्रूमः उक्ता द्विपंचकं केचिद्गायत्र्येव कथ्यते तथा यतिजगत्यादि संतिछंदः प्रवर्तते उक्तादिपंचक
स्योक्तं कृती नाम अथ वक्ष्यते तत्र कृतिः त्रिस्तुर्धर्मो विभा तु स आकूत्या मनसा सह विराजा ज्योतिषा सह यज्ञेन मसा सह ब्र
ह्मणा तेजसा सह क्षत्रेण यशसा सह सत्येन तपसा सह तस्य दोहमशीमहि तस्य सुम्नमशीमहि तस्य महमशीमहि
प्रकृतिः भर्गोअनप्रकृत्यत्कं इंद्रोयानुपूर्वगोगवः यस्यां सदो हविर्धाने यूपं अस्यानुमीयते ब्राह्मणा यस्यामर्चयंति
ऋग्भिः साम्ना यजुर्वेदः पश्यंते यस्यामृत्विजः सोममिंद्राय पातवे सानो भूतिर्दक्षिणामास्कंदोवा यज्ञेदधातु कमनस्य
मांना इति पंचावसाना आकृतिः तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं नंदाम शरदः
शतं मोदाम शरदः शतं भवाम शरदः शतं शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीतास्याम शरदः शतं ज्यो
क्च सूर्यं दृश इति विकृतिः इषेसोमाः स शर्मीणं भगं तमेषे ऋषभेः शतारश्र्थे तनो भिरिति दद्रानेजैर्महस्वं तोमदाम
शोरेणपरिष्टुताः शुक्राः प्रयस्वंतो मृताः प्रस्थिता वो मधुश्चुतः तानश्विना सरस्वती इंद्रः सुत्रामा वृत्रहा जुषंतां सोम्यं मदि
रं चं तु विषंतु सोममिति दशाष्टाक्षराः पादा एकएकादशाक्षरः संकृतिः देवो अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः सत्य
मन्मायजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाड्यां अपिप्रेर्ये ते होत्रे अमत्सत तां ससनुषीं होत्रां देवंगमां दिविदेवे
यज्ञमेरयेमं स्विष्टकृत्सुत्रामासविताभिषक् इष्टेदेवो वीर्ष्टहोता भूर्वसुवने वसुधेयस्य नमोवाके वीहीति देवो अग्निः स्वि
ष्टकृद्देवानयक्षद्यथायथं होतारा विंद्रमश्विना वाचा वाचं सरस्वती अग्निं सोमं स्विष्टकृत् स्विष्ट इंद्रः सुत्रामा सविता वरुणो
भिषक् इष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपा इष्टो अग्निरग्निना होता होत्रे स्विष्टकृत् यशो मदधाति यजस परिष्वि
तिं स्वधां इति त्रयोदशा त्रपादाः उत्कृतिः छागस्य हविषः आत्तामद्यमध्यतो मेद उद्धृतं पुरा द्वेषोभ्यः पुरा पौरुषेया गृभः

घस्तां नूनं घासे अज्राणां पव स प्रथमा नां सूक्ष्मक्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामतः
उत्सादतो गादंगादवभ्रानां करत एवेंद्राग्नीलुपनां हविरिति अतिछंदांसि संप्रोच्य यथा संपरिभाषते ११ सूक्तसंख्यानुवर्तत अन्
स्याः सूक्तसंख्यायाः सूक्तेक्वां संख्या मा पूर्वमुक्ता अन्यस्याः सूक्तसंख्यायाः आ अधिक्रियत इति वेदितव्यं आङ् मर्यादायां वायोवाय
वेंद्रवायवं मे आवरुणास्त्वा इत्याग्निं नवेत्यनुवर्तत इत्यर्थः इहप्रसूक्तग्रहणं असत्कृतगतऋक्संख्यायामवधित्वमधिकारस्य
माभूदिति तेन आ दद्धेत्येताः षण्मारुत्य इति षट्संख्यायाः नाधिकारः नाप्यवधित्वमिति सरूपरूलुदशेति दशाइंद्रमिति द
शसंख्यानुवर्तत इति सिद्धं ऋषिश्चान्यस्मादृषेः शब्दा विशिष्टः अनुवर्तत इत्यनुवर्तते अन्यस्मादृषेः प्राक् प्रकृत ऋषिश्चा
नुवर्तते स चेद्वाविशिष्टो भवति वाविशिष्टो वाव शब्देन विशेषिनः यधुक्तो वाद्यान्सिय यथा आस्यस्त्रितो वा त्रितो वा भव
तिमद इत्यर्थः इंद्र विश्वा अवीवृधन्नित्यतः प्राक् शायवपाहीत्यादौ मधुछंदस्यादि निदर्शनं अथवा विशिष्ट इति चंद्रमा एको
नाम्यस्त्रितो वेति वा विशिष्टस्त्रितः इंद्रं मित्रं वरुणमग्निमूतये इत्यादिमास्मानुवर्तत इति अथ निपातविशेषान्वयं नतत् परि
भाष्यते तुहि हवेंनछ विशिष्टान्यृषिर्देवत छंदांसि द्वित्रिचतुःपंचषट्सूक्तभांजि यथासंख्यं तुहि हवेन इति पंचभिः श
ब्दैः विशिष्टानि संबंधानि ऋषिर्देवतछंदांसि यथासंख्यं द्वित्रिचतुःपंचषट्सूक्तभांजि सूक्तान्वयवंति भवंति कदा नरस्तुदे
वनीवारुणं त्रैष्टुभं गायंति द्वादश्यानुष्टुभमिति तुशब्दोक्तौ ऋषिर्देवत छंदांसि द्विसूक्तान्वयं विद्यात् एवं हिशब्दयोगे त्रि
त्वं हयोगे चतुष्कं वेयोगे पंचतां नशब्दयोगे षट्कं इति द्रष्टव्यं तत्र भांजीति भजो ण्विः अतउपधायाः श्रोतुमू अनिरुक्तासं
ख्या विंशतिः स्वरूपेणोक्तानिरुक्ता नवेत्यादि पंचाशत्पंचाधिकेत्यादि विशेषरूपेणोक्ता स्वरूपेणनोक्ता अनिरुक्तसंख्या
विंशतिरिति वेदितव्याः यथा कस्य पंचोनेति पंचोनविंशतिः पंचदशेति एवं विंशतिशब्दः इदं विंशतिरूपस्यामित्यादिषु
विंशतिग्रहणानि वार्थवंति भवंति अन्यथानुवृत्तसंख्यानुक्तिविंशत्यो विषयविभागोपि न ज्ञायते किंच एवं वा नादे
शेविंशो देवतेषु नरत्रा नादेशग्रहणं वार्थवद्भवति इतरथा अनएवानिरुक्ते संबानुवर्तयिष्यत इति अनादेशे विंशो
देवता देवतानामनुक्तौ तुल्येयं इंद्रो देवता ननव आतुर्युजती त्यादौ इंद्र एवेति सिद्धं भवति तुशब्दोवधारणे सुरूपछ

119
1916

छंदसेंद्रमित्यादौ नतु नके रेवेंद्रलेसिद्धेमंडलादिषादिषाग्नेयमैंद्रादित्याग्नेयापवादार्थमें द्रग्रहणमेवमुत्तराण्यपि दशेंद्रस
चेंद्रग्रहणानि वेदितव्यानि त्रिष्टुप्छंदः अनादेश इत्येव छंदोनुक्तौ त्रिष्टुप्छंदो भवति तेनेंद्रस्य पंचोनेत्यादौ छंदोनुक्तौ त्रि
ष्टुप्छंद एवेति सिद्धं देवगानोवारुणं तुत्रैष्टुभमित्यत्रानुक्तेरेव त्रैष्टुभत्वे सिद्धे त्रैष्टुभमिति आदो गायत्रं प्राक् हिरण्यस्तु
पात् इति गायत्र्यापवादः तथा प्रगाथा बार्हताः अनादेश इत्येव अयं दश प्रगाथमित्यत्र विशेषानुक्तौ बृहती सतो बृहत्यो बा
र्हत इत्युक्तो बार्हत एव प्रगाथो भवति युजः सतो बृहत्यः अयुजो बृहत्य इति प्रसिद्धं विंशतिका द्विपदा विराजः द्विपदा विंश
त्यक्षरा परिमाणतः छंदस्तो विराज इति विद्यात् पश्चाद्दशपराशरः श्रेयो द्विपदमित्यादौ तदर्धमेकपदा या एकपदास्ताद
शाक्षराः परिमाणतः छंदस्तः पूर्ववत् विराज एव विद्यात् पद्येकपदेति तदर्धमिति विंशत्यर्थमित्यर्थः अथ प्रसंगात् द्विपदा
ध्ययनकालविशेषमाह द्विर्द्विपदास्त्वृचः समामनंति ऋचो ध्ययने त्वध्येतारो द्वे द्वे द्विपदे एकैकामृचं कृत्वा समामनं
ति समामनेयुः अधीयीरन् छंदसां लङ्थे लेट् शामादिनाशपि अनादेशाः द्वे द्वे द्विपदे यासां ताऋचो द्विर्द्विपदाः समामन
तीति वचनात् शंसनादौ न भवंतीति न पश्चान्नात्युभिति शंसने दशर्चत्वं आसां चाध्ययने पंचर्चत्वं भवति अयुक्त्वं स्याद्द्विपदेव
समामननीत्येव अयुक्ष्क एकादशादिषु अंत्ये वद्विपदा एव भान्याः यथा वनेमैकादशोस्त्र साधुर्न गृध्नुरित्यादि मंडलादि
षाग्नेयमैंद्राव आग्नेयात् ऐंद्रसंशब्दनात् प्राक् मंडलादिषाग्नेयं विद्यात् यथा अग्निं नवमधुछंदाः स्त्वमग्ने आ गतं त्रिस्या
षाग्नेयमैंद्रा अन्याऋचोज
दिषु त्रिष्टुभं नस्यसूक्तस्य शिष्टा जगत्यः यस्य सूक्तस्यांते त्रिष्टुबं नस्त्वसुच्यते तस्य सूक्तस्य दर्शेशिष्टाः अन्याऋचो ज
गत्यो वेदितव्याः यथा आग्नेयं त्रिष्टुबंत्या इमीषां कश्यो चेति आदो गायत्रं प्राग्घिरण्यस्तूपात् सहितादो त्वमग्ने श्रूना
हिरण्यस्तूप इति हिरण्य संशब्दनात् छंदो गायत्रीति विद्यात् छंदसः प्रत्ययविधाने नपुंसके स्वार्थे उपसंख्यानमिति ॥
गायत्र्येव गायत्रं संहितापेक्षमादित्वं अन्यत्र हिरण्यस्तूपस्यानुपलंभात् संहितायाः परप्रकृतत्वात् च ३२ इति द
दशखंडेषु परिभाषा प्रवर्तिता अथाग्निमीळ इत्यादि खिलरहितसपादशाधिकसूक्तसहस्रस्य प्रतिसूक्तमाद्यसू

२

ऋ॰वी॰भा॰
१०

कृषतिज्ञानमृष्यादिदर्शयितुमुपक्रमते अत्रचसूक्तेष्वनुक्तं परिभाषयोग्राहीतव्यं अत्रशास्त्रेसर्वत्रनयार्थाज्ञातव्याः सूक्ता
दिसूक्ते षट्कसंख्या छंदःपादःक्षराणि देवतमृषेर्नाम गोत्रंचक्रवितव्यथावेति अग्निंनवमधुच्छंदावैश्वामित्रः अग्निमिति सूक्ता
दिः ईळेपुरोहितं नवेतिसूक्तस्यऋक्संख्या मधुछंदाइतिऋषेर्नाम वैश्वामित्रइतितस्यगोत्रं अतइत्योपवादः ऋष्य
णु आंदोगायत्री प्राग्घिरण्यस्तूपादिति गायत्रीछंदः मंडलादिषाग्नेयमैंद्रादित्यग्निर्देवता सुरूपकृत्नुंद्रशैंद्रमित्यतः प्राकृत्रि
पदागायत्रीपादाश्चाष्टाक्षराः प्रथमंछंदस्त्रिपदागायत्रीअनादेशेष्टाक्षराः पाद्देति एवमुत्तरत्रापिसर्वत्रोक्तादेवान्य
त्परिभाषातोग्राह्यं सूक्तादिरेवसर्वत्रस्थिरः अन्यद्धिवार्यं अत्राग्निः पूर्वेभिरित्येकोनत्वाभिचृद्गायत्री वेदितव्यं एवमुत्त
रत्रापि उष्णिहादीन्यूनत्वेति चूनमेकोधिकेभूरिक्षूनत्वेविराड् आधिक्येस्वराड्वंच तत्रछंदःस्वेसुपमइवेति वेदितव्य
मित्यावार्षदंयमपिनामिदपि प्रत्ययवायोवायव्येंद्रवायवंमैत्रावरुणास्तृचाः आयाहि नवेत्येव ऋषिःसएव छंदश्च
तदेववायव्यंवाम्ववितियत् ऋगुणः शेषो इतिवायव्यं इंद्रवायूमित्रावरुणाभ्यामण्आदिवृद्धिः देवताद्वंद्वेचेत्यानङ्
उभयत्रवायोःप्रतिषेधः दीर्घाच्चवरुणस्यऐंद्रवायवः मैत्रावरुणः ऋत्विदेरुत्तरपदादिलोपइतिसंप्रसारणं ऋक्पूरि
त्यकारः तत्रःदेवतानिर्देशः आग्नेयत्वापवादः एवमुत्तरत्रापिअश्विनाद्वादशाश्विनैंद्रवैश्वदेवसारस्वतास्तृचाः युञ्च
रीः तृचाइत्येव मधुछंदागायत्री अत्रद्वंद्वजातत्वादश्वावश्विनौअतइतिदेवतानामणि इतण्यत्रपस्य तइति प्रकृतिभा
वः आश्विनःसारस्वस्याअण्सारस्वतः सप्तैताःप्रउगदेवताःएताःवायव्याद्याःसारस्वतांताः वायवायाहिअश्वि
नेतिसूक्तद्वयवर्तिवसप्तकस्तुचाः प्रउगदेवताः प्रउगंनामहोतुःप्रातःसवनिकंद्वितीयंशास्त्रंसप्तेतिपूर्वसूक्तस्यार्थे
एताइतिएताःवतिप्रउगमितिसंख्यासन्निहितत्वाद्वाव्यादयएवस्युःरव्यातादशाएवास्तुवायोसैकागायत्रं उक्ता
देवताप्रउगेणेत्यत्रएतक्रमोक्तादेवतासप्तकसंज्ञानार्थमिदंसुरूपकृत्नुंद्वशैंद्रं ईनयेदशार्चमिदंसूक्तं ऐंद्रंमधुच्छंदा
गायत्रंच आतुसूक्तसंख्यानुवर्तते दशार्चमाधुछंदसं अनादेशादेर्द्रंगायत्रंच अपितयोआमरुतः दशेत्येवअभ्रं १०

121
1916

आदेर्हेत्येताः षट्कं वोमसद्देवत्याः आस्तवीळुविदाहजतूतिः इंद्रेणसंहिदक्षसइत्येतेऐंद्रद्यौवकारान्माहत्योव षट्स्तुहि
नीयाश्चतुर्थादितेदेशिष्टाऐंद्र्यः मधुछंदागायत्रं इंद्रमित् देशेत्येवगाथिनः इंद्रोमधुछंदागायत्रं ऐंद्रसानसिं दशेत्येव
रयिंइंद्रोमधुछंदागायत्रं इंद्रेहि दशेत्येव मत्सि इंद्रोमधुछंदागायत्रं अन्यत्सर्वंपरिभाषयेवसिद्धं गायंतिद्वादशानुष्टु
प्तं तुवाद्यौवदशावद्वादश्चष्टनइत्यानंतुगिपरिभाषासिद्धंतेन दंवोतरंचइदेसूक्ते आदे हि सूक्तसाशानुष्टुसं अनुष्टुप्छं
दस्कं गायत्रत्वापवादः चतुरष्टकानुष्टुप् ऐंद्रंसएवऋषिः इंद्रमष्टौजेतामाधुछंदसः विश्वाःअष्टास्यओशजसूमधुछंदः
सूनोर्जेतानामर्षिः मधुछंदसोण् अनुष्टुप् इंद्रएवदेवता अग्निंद्वादशमेधातिथिः काण्वआग्नेयमग्निनेतिपादोद्यग्नि
देवतानिर्मंथ्यआहवनीयाभ्यां दूतं मेधातिथिर्नाम कण्वगोत्रः अतइत्योपवादः ऋष्यण् आग्नेयं अग्नेर्ढक् अग्निदे
वत्यसूक्तेइत्यग्निनाग्निःसमिध्यतइतिपादोद्यग्निर्देवतः द्वावग्नीदेवतेअस्यसः कौद्वौनिर्मंथ्याहवनीयश्चनिर्मंथ
नेनप्राप्यःअरणिजःसोग्निरित्युच्यतेएत्यहूयतेस्मिन्नित्याहवनीयः कुदानादानयोः अधिकरणेनीसीरसौतौ
ग्निरित्युक्तः यथासंख्येनगायत्रं सूसमिद्धइत्याप्रः समिद्धोग्निस्तनूनपान्नराशंसइळोबर्हिर्देवीद्वारःउषासा
नक्तादैव्याहोतारौ प्रचेतसौतिस्रोदेव्यःसरस्वतीळाभारत्यस्त्वष्टा वनस्पतिःस्वाहाकृतयइतिप्रत्यृचंदेवताः सुस
मिद्धोनः आद्वादशेत्येव मेधातिथिर्गायत्रमिति अस्मिन्सूक्तेआद्याइध्मोग्निर्देवता समिद्धोग्निर्वा अथतनूनं
पान्नराशंसः अथेळःजसः अथबर्हिः अथदेवीर्द्वारःजसू इयंदेवाज्ञानिङीषु जसिपूर्वसवर्णः अथोषासानक्ता
अथदैव्याहोतारौ अथएवंव्याख्यातेप्रचेतसाविति प्रकृष्टज्ञानवन्ताविति तौचाग्न्यादित्यौ अग्निवरुणौ वरुणादि
त्यौवा अथतिस्रोदेव्यः तासांस्वरूपमाह सरस्वतीळाभारत्यः सरस्वतीब्रह्मपत्नी इळाविष्णुपत्नी पृथिवीत्यर्थः
भरतस्यादित्यस्यपत्नीभारती अथत्वष्टावनस्पतिः अथस्वाहाकृतयाकाएताः विश्वेदेवाः तथाहिब्राह्मणं तदाकु
कादेवताःस्वाहाकृतयइतिविश्वेदेवाइतिब्रूयादितिइत्येवंप्रत्यृचमृचंप्रतिदेवताः यथासंख्यमन्वयोहिलोकिकः

ऋ०भा०
११

यथा पर्मिद्रमुत्तमानंगंपुंस्कोकिलकलापिनः वक्रकांतिः क्षणगतिःस्वरकेशोस्त्वयाजिता इति लक्ष्मी प्रति नारदस्तोत्रे दर्शि
तात् एतदाप्रीसूक्तं एतत्सूक्तमाप्रीसंज्ञं भवति आप्रीभिराप्रीणाति हीनायजत्याप्रीभिरिति ब्राह्मणसूक्तविनियोगस्त्वान्व
र्थमिदं एतेनान्यान्यूक्तदेवतानि अस्मिंछास्त्रे अस्माभिरामीत्युक्तानि एतस्मिन्छास्त्रेसुसमिद्ध आप्रिय इत्याद्यद्युक्ता
न्यन्यान्याप्रीसूक्तान्येतेनसूक्तानि प्रतिपादितदेवतानि भवंति एतत्क्रमकेदेवतानीत्यर्थः एकादशकानिच नाराशंसान्या
प्रशंदीकान्यतनूनपांति अस्मिन्छास्त्रेअस्माभिरामीत्युक्तानि नराशंसयुक्तानि तनूनपाद्वर्जितानि एकादशर्चानि
भवंति यथासमिद्धएकादशापमित्यादौआप्रशंदीकान्यतनूनपांतीतिमिद्धमन्यदिस्य त्वार्थे नत्र तत्सुक्ते रेकादश
त्वंसिद्धं परिशेष्याच्चनाराशंसवंतेति एभिर्वैश्वदेवं द्वादशीत्येव अग्नेद्रुवः मेधातिथिः काण्वो विश्वे देवा गायत्रं इंद्रसोममृत
व्यं द्वादशीत्येव पिबाऋतव्यंशेषाणृतुपित्रुषसोयत् ऋतुदेवत्यं ऋतवीवसंतायाः मेधातिथिर्गायत्रं तत्रेंद्री मारुतीत्वाष्ट्या
ग्नेय्यैंद्री मैत्रावरुणीचतस्रोद्रविणोदस आश्विन्याग्नेय्यृतुदेवताः सर्वत्र ऋतुदेवत्येसूक्ते आद्याइंद्रदेवत्या अथमारुती
अथत्वाष्ट्री अथाग्नेय्यी अथैंद्री अथमैत्रावरुणीदीर्घाच्चवरुणस्येत्युत्तरपदवृद्धिः निषेधाद्देवतानि अथद्रविणोदस
नामकदेवताभिधायिन्यः द्रविणोदसइतीनदर्थेंद्रः अथाश्विनी अश्विदेवत्या आग्नेयी द्वादशी ऋतुदेवताः × यतस्ता ×
सर्वत्र एताद्वादशदेवताः एतक्रमेका ऋतुदेवत्ययुक्त देवताः इतिवेदितव्याः सर्वत्रं चैवंभवति नत्रतुस्यं षकृतव्यं
तुजागतंतुमंदस्वेत्यत्रोपनिषंतेसूत्रेवऋतुयाजेष्वरंतीति आवानविवहंतुमेधातिथिर्गायत्रमिंद्रः इंद्रावरुणयो
रिंद्रावरुणंसुवाकुपादनिवृतौ नवेत्येवअहं इंद्रावरुणादेवत्यं युवाकुहिशश्वीनामिति त्रिसप्तकेदे ऋचौ शिष्टाग
पत्याः मेधातिथिः सोमानमितिपंचब्राह्मणस्पत्याश्चतुर्थ्यामिंद्रश्चसोमश्चपंचम्यां दक्षिणाचान्याः सादसस्पत्यानाग
राशंसी शंत्या नवेत्येव स्वरणं अत्ररचर्वैसूक्तेआदितःपंचर्चोब्राह्मणस्पतिदेवत्याः पत्यंताण्यः आदिवृद्धिःशा
पूअसअण्चतुर्थ्यामपि इंद्रश्चसोमश्चकाराद्ब्राह्मणस्पतिश्चदेवतात्वेनस्थिताःपंचम्यामपिदक्षिणा च ११

कारात्ब्राह्मणस्पतिश्च अन्याशिशास्वतस्रः सादसस्पत्याः सदस्पतिदेवत्याः नाराशंसीवांत्या अंत्यायांनवम्यां सदस्पतिनाराशंसो
वादेवताविकल्पे मेधातिथंगायत्रं प्रतित्यमाग्निमारुतं नवेत्येवचारं अग्निश्चमरुतश्चदेवताअस्येतिदेवताद्वंद्वेत्यो गायत्री
मेधातिथिःकण्वः अयमश्वाशार्भवं देवाय आर्भवं ऋभुदेवत्यं गायत्रं मेधातिथिः इहबषेंद्राग्नां इंद्राग्नीमेधातिथं गायत्रमिंद्राग्नी
देवतेत्यत्रकुर्युआसेकानतस्रआश्विन्यस्तथासवित्र्याग्नेद्देवीनामेकंद्राणीवरुणान्यग्नायीनां द्यावापृथिव्ये पार्थिवीषडैवेष्णव्यो
तौदेवादेवी वाविनोपयस्मेकाएकयामहिताविंशतिः अनिरुक्तासंख्याविंशतिरित्युक्तो मेधातिथिर्गायत्रं आदितश्चतस्रआश्विदे
वत्याः तथाचतस्रःसावित्रइत्यर्थः सावित्र्यासवितुरं तोडीपोजस्अण् आग्नेय्यां अग्निदेवत्यौ द्वे देवीनां अग्निंसर्वदेवसंबंधिन्यो
स्मिन्नस्त्वेनताना विति डीपु आभिनुङ अंथेकं द्राणीवरुणान्यग्नायीनां इंद्रेंद्राणीमित्येषातिस्रोदेवतास्त्रोति इंद्राणीवरुणा
नीइंद्रावरुणन्यादिनाश्चियांपुंयोगेडीषौनुकौ आग्नायीरग्नाकपायी अग्निरितिडीपु एत्वं च देये अथद्यावापृथिव्ये
द्यावापृथिवीद्युनामीरीयनिवनटापजसःशीआदुणः अथपृथिवीदेवत्या पार्थिवीपृथिव्या अणोडीपु अथषड्चोविष्णु
देवत्याः वैष्णव्याःविष्णुदेवत्याःओर्गुणः तसियण अतोदेवाभवंतुनइत्यकुदेवीदेवदेवत्यांवैष्णवीवा अतोदेवाःइतिदेवी सू
क्तशेषंतुवैष्णवमिति देवतानुक्रमण्यां अतोदेवाअवंतुनइतिजपदपिवान्यांवैष्णवीमितिसूत्राच्चविकल्पतः तत्रस्वन्या
मित्यनेनपूर्वस्यांवैष्णवीत्वंसाध्यते तौ ब्राश्चतुर्विंशतिर्वायव्ये कंइंद्रवायव्यौमैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः
शेषा अप्यांत्याश्यांडाग्नेय्यश्चतंतः पुरउष्णिक्तिस्रश्चांत्याएकविंशीप्रतिष्ठासामासः पूर्वोक्तसंकेतिवाच्येत्रचतुर्विंशति
रित्युक्तिरविशेषाद्यविस्पष्टार्थं परिभाषणं तर्हिसचतुर्षतिरात्यतामितिचेद्देवित्यमेवं प्रयोजनं आद्यावायुदेवत्या ए
कैतिद्वंद्वनिवृत्त्यर्थं वायव्येकंइंद्रवायव्याविति द्वेद्वेअनादेशेतृतीयेंद्रीस्यात् अथद्वेएंद्रवायव्यौ इंद्रवायुदेवत्ये॥ अथ
मैत्रावरुणदेवत्यएकस्तृचः अथमरुत्वतीयस्तृचः कुतएतन्मरुत्वतीयइत्युक्ते मरुद्भिर्णेद्रदेवत्यइति मरुत्वांस्त्विंद्रोदेवतेति
निवक्ष्यमाणत्वात् मरुद्भिस्सहानीतिगम्यते मरुत्वतीयःमइतिमृङःप्राणत्यागे मृत्योरितिमरुत्वत्यइति तसोमत्वर्थेइति

128
1916

ऽत्वं द्यावापृथिवी त्यादिनाद्दगृ अथ वैश्वदेव एकस्तृचः विश्वदेवदेवत्य इत्यर्थः अथ पूषदेवस्य एकस्तृचः पोष्ठ इति देवतादिपूर्व
पूर्वद्दन्नित्यलोपः अथ शेषा आप्यः अपूर्वमुक्तं पंचदशकादन्या नवा देवत्याः अंबयो यंत्याद्याः शेषा इति शेष असर्वोपयो
गे कर्मणिप्यन् अप्य इत्यय् दृशाद्यादणो ङीप् स्त्रीजसियण् अंत्यार्ध्यर्द्धाग्नेयी पूर्वस्वाग्न इत्यर्धर्च युक्ता संमाग्नेवर्च
से त्येषाग्निदेवते त्यर्थः तत्राप्स्वंतः पुरउष्णिक् द्वादशकद्वयाद्यः अन्त्यावष्टका इत्यर्थः सांहितिकः कंपएव श्रुत्येनास्ति अप्सु
म इत्याद्या पञ्चविश्वभेषजीरित्यंत्या नुष्टुप् गायत्रीछंदो युक्तेत्यर्थः तिसृश्चांत्या अनुष्टुबित्यनुवृत्तमनुष्टुभमिति विपरि
णम्यते इदमाप आपो अद्य संमाग्न इत्येता अनुष्टुभ इत्यर्थः शिष्टा गायत्र्यः मेधातिथिः कस्य पंचोना जीगर्तिः शुनःशे
पः सकृत्रिमो वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमादौ काय्या ग्नेय्यो सावित्रस्तृचो गायत्रोंत्यां त्यां भागीवा नूनं पं
चोना पंचदश आजीगर्तिः अजीगर्तिशब्दादत इञो पादः ऋष्यण् प्राप्ते बह्वादिः अजीगर्तिः पुत्रो जन्मना शुनःशेपो ना
म शेपपुच्छलांगूलेषु शुनः संज्ञायां षष्ठ्या लुक् शुनःशेपः कृत्रिमः क्रियायां निर्वृत्तः डुकृञ् करणे ड्वितः क्त्रिः क्त्रेर्मम्नित्यं वि
श्वामित्रः दत्तपुत्रतया विश्वामित्रस्य पुत्रः देवरातो नाम देवैः रातः दत्तः रा दाने श्रूयते हि देवा वा इमं मह्यम रासतेति स ह
देवरात इति वारुणं तु इदं चोत्तरं च द्वे सूक्ते वरुणदेवत्ये त्रिष्टुभमिदं सूक्तं प्राग्धिरण्यरूपाद्यत्त्रादगायत्रत्वापवादः अत्र
चादौ काय्या दैवत्या कदाच्छान् प्रजापतिवचनात् कस्येदितीत्त्वे इष्टिः अण्ङीप् अणो यस्येतिलोपः ब्राह्मणे स प्रजापति
मेव प्रथमं देवतानामुपससार प्रजापतिरितिदर्शनात् प्रजापत्ये मंत्र भवितुमर्हति न तु कायीत्युच्यते प्रजानां पतिः प्रजा
पतिरित्यर्थः कृत्वा तद्युक्तः अथ द्वितीया अग्नेर्वयमित्येषाग्नेयी अथ सावित्रस्तृचो गायत्रः अभित्वादेव सवित
रिति तृचः सावित्रदेवत्यो गायत्रीछंदस्क एवं गायत्र इत्यत्र विहित त्रैष्टुभत्वापवादः अस्य सावित्रस्य तृचस्यांत्या भगभ
क्तस्येत्येषा भगदेवत्या सावित्री वा शिष्टा दश वारुण्यः अत्रेतिहासः श्रुत्युक्ते सम्यगेव प्रवर्ण्यते हरिश्चंद्रो ह वैध
स इत्यादि ब्राह्मणेरितः राजसूये कृतावेष शौनःशेप इति श्रुतेः शतभार्यो हरिश्चंद्र ऐक्ष्वाकः पुत्रकाम्यया नारदः १२

शतपुत्रार्थो वरुणं सुतमापवान् जाते पुत्रे त्वामनेन यक्ष्येनमिति वीकृतवान् वरुणस्तनये जाते निर्दिष्टे जातदंतके त्युतदंते पुन
र्जातदंते वर्मसंभृतीनथा मध्यस्थो दंतवस्थो सावितिराज्ञा प्रतारितः निर्बध्य स नृपं प्रोचे स्वपुत्रेण यजस्व मां इत्युक्तो वरुण
नात्मपुत्रं देहितं नृपं एनं पश्ये त्वया घ्नितेति सो भ्यद्रवद्वनं वनस्थो रोहितः श्रुत्वा नृपं जातं महोदरं दिदृक्षुः पंच पंच वर्षेषु रि
त्रे रुपंद्रवारितः नष्टे जागर्तिनामानं त्रिपुरं बाधितं क्षुधा आसाद्यास्य शुनःशेपं मध्यमं जगृहे स्कृतं गवां शतेन पितरं पुरस्थ
दृष्ट्वात्मनं यथाकार्यमनेन त्वं कुरुतानेन वा ब्रवीत् वरुणो पितृपणो त्वं शुनःशेपं पशुं कर्तुं यूपे बन्धः शुनःशेपो जिघांसुः पि
तरं ततः ईजे तिछा हमंत्रे व उपधावामि देवताः अस्तोत्कमात् कमग्निं च सवितारं भगं च वा वरुणं पुनरप्यग्निं विश्वेदेवानथो
खलु इंद्रस्य पूर्वव्यापारसंप्रा प्रस्तुतिसं प्रियं हिरण्मयरथस्यापितस्मै तारमेव च अश्विना उषसं चापि तु वाभ्यां गतेतस्त
दा अतिप्रीतिस्तुतो दैवैस्त्वय्पा प्रोवितस्तदा ऋत्विग्गणः प्रार्थितोमा वंजस वमकारयन् ततरो गहरिश्चंद्रय त्रावतिस्तू
कृतः अंजः सर्वा राजसूये त्र यागः पश्विष्टि इत्यादि विहीन एकः स नेकुत्सी कुत्सितो नोत्र सौयस्याः जसा देवता स्तंभ जेतिने सपि
ता प्रार्थितस्य कान्तं तं गाधिभूतं ततः पुत्रत्वेन गृहीतश्च विश्वामित्रेण धीमता देवरात इति प्रोक्तो दैवैर्दत्तस्ततः स्वयं द
त्तपुत्रविधिर्योगाद्वैश्वामित्रः सकृत्रिमः आर्षानुक्रमणे चोक्तं कस्य नूनं शुनःशेप आजीगर्तिः सकृत्रिमस्तु वैश्वामित्रो
देवरात इति कृत्रिमपुत्रत्वं देवरातत्वमेव अजीगर्तिसुतत्वं च वैश्वामित्रत्वमेव च शुनःशेपमहर्षिस्तु सम्यगत्र प्रवर्णि
तं बंधस्सयकरीणा शमोचनीयं कथ्यते ता यच्चिद्धिका हि तो से का एकविंशतिः गायत्री वारुणं त्वमग्ने प्रथमो अंगिरा इत्य
तः प्राक् शुनःशेपार्षं वृदितव्यं वसिष्ठदशाग्ने यं तु हि मित्येध्या इदं चोत्तरं च द्वे सूक्ते अग्निदेवत्ये गायत्री शुनःशेपः अ
श्वं स पो नागा पत्रं त्यां देवी त्रिष्टुप् ततास पाश्चिरून विंशतिः त्रयोदशोत्यर्थः गायत्रे सूक्ते त्या त्रयोदशी नमो महद्भ्य
गत्यः आंगिरसः कृष्ण इंद्रः आभात्तु त्रैत्रिष्टुबादि एकादशा इंद्रः तिस्रस्त्रिष्टुभ आदौ यस्य तत् इदमधिकाराद्धि त्रिष्टुबंते
वंति मध्ये षड्गत्यः आंगिरसं कृष्ण इंद्रः दिवस्परि द्वादश वत्सप्रिराग्नेयं तु प्रथमं वत्सप्रिर्नाम भाकंदन इत्युक्त आग्नेयमिद ५९
सुत्तरं च त्रिष्टुप् ५८ ॐ प्रहोता दश आनः वत्सप्रिर्भालंदनस्त्रिष्टुप् अग्निः जगत्या शेषः सप्तगुर्वैकुंठमिंद्रं तुष्टाव ते द

213/1916

क्षिणं सप्तगुर्नामांगिरसो वैकुंठमिंद्रं तुष्टाव अभिस्त्रिष्टुप् ऋग्भिः विकुंठाय अपपत्यमिति शिवादिभ्योण् इंद्रमिति विकुंठविशे
षिताय अनादेशादैवेंद्रत्वे सत्यं असत्यस्मिन् विकुंठ देवतत्वं स्यात् उत्तर त्रय सप्तगुस्कृति संदृष्ट इति दर्शनात् अस्यानेंद्रत्वं
नास्तीति वेत् नहि वैकुंठमिंद्रं तुष्टावेति पदत्रयमप्यक तुं वाक्यं अथेंद्रस्य वैकुंठत्वमुपपादयितुमितिहासमत्रेति विकुंठाना
मासुरी इंद्रतुल्यपुत्रमिच्छंती महत्तपस्तेपे तस्याः स्वयमेवेंद्रः पुत्रो जज्ञे आसुरी असुरं जातिङीप् ०तपः कृच्छ्रचांद्रादिकं परत
कृत वती तप संतापइति तुपस्तपत् अनत्कृ हल्मध्य इत्यत्वाभ्यां लोपो यस्याश्च म सामान्यो मास्मभूदिति स्वयमेव पुत्रो ज
ज्ञे सूतवान् जनी प्रादुर्भावे अस्य अनुदात्तोपदेशगम हतेत्युपधालोपः इत्येवमिंद्रस्य वैकुंठत्वं सिद्धं तथास्य चावैकुंठस्य स
प्तगुस्कृतस्यैंद्रस्य उत्तरसूक्तत्रयदर्शित्वस्य यत्तच्च आह तथा चाह सप्तगुस्तुतिः संहृष्ट आत्मानमुत्तरैस्त्रिभिः सुष्टाव अगृ
भादिसूक्तदर्शिनः सप्तगुर्नाम ऋषेः स्तुत्या सुप्रीतः सवैकुंठइंद्रोविस्मितः तमाहात्म्यं बुध्वा ऋषिमध्य आत्मानमहं भुवमि
त्यादिसूक्तत्रयेण तुष्टाव एवं चाहमिसाक्षिसूक्तत्र्ययेदेवतात्वं ऋषित्वं चेंद्रस्यैतासिद्धं भवति अहं भुवमेकादशा स्त्रेत्रिष्टु
भोसप्तमी च वस्तुनः दशम्येकादश्ये सप्तमी चेति तिस्रस्त्रिष्टुभः अष्टौ शिष्टा जगत्यः वैकुंठ इंद्रो द्रष्टा स्तुत्यश्च अहं दशमस्तो
यं च एकादशा वैकुंठ इंद्र ऋषिर्देवता च द्वितीयाएकादशी चेद्वे त्रिष्टुभौ शिष्टा जगत्यः प्रवो महे सप्त द्वि जगत्यः प्रवो महे सप्त द्वि ज
गत्यावंतं के तो सिसारिण्यो मंदमानाय आदावंते च द्वे जगत्यौ तस्य तत्कर्मधारय द्वंद्वगतो बहुव्रीहिः अत्र च केतनरइति द्वे अभि
सारिण्यौ दशाक्षरा वादितो द्वौ ततो द्वौ द्वादशाकौ पराविलयर्थः शिष्टे का त्रिष्टुप् ऐंद्रो वैकुंठ ऋषिर्देवते अथ महत इदुल्वमि
त्यादि सूक्तत्रयस्य ऋषिर्देवताज्ञानार्थं कथामाह ९७ वषट्कारेण वकृशुष्णान् सुसौचीकोग्निरपः प्रविश्य देवैः समवददुत्त
रैः स्त्रिभिः स्व भ्रातृषु त्रिष्वग्नि होतृत्वाद्वषट्कारेण वज्रभूतेन वक्णेषु छिन्नेषु सत्सु ॐ प्रश्चूद्ने आदितः श्वेतिनिष्ठानत्वसित्थ
त्वात् वोः कुग्वहि ज्यादीति संप्रसारणं एषांकनिष्ठः सौचीकानामाग्निर्वषट्कार हविर्वहनाभ्यां भीतः अपः प्रविश्य नष्टः
तत्र द्वाव प्रदर्शिनः संतष्टमुमागेते देवैः समवदत् संवादमुत्तरसूक्तत्रयेण वषट्कारहविर्वहनभीतिं नष्टत्वं च श्रुत्वं तरात्
अग्नेस्त्रयो भ्रातरो भ्रातर आसंते देवेभ्यो हव्यं वहंतः प्रमीयंतेति हासमामनंति अथ विविन्य दर्शयति महत्तं च तत्र युञो

ग्निवाक्यंविश्वइत्युत्तरंचत्वषट्कमथुजोदेवानांयमेछामित्युत्तरंचैकादशाकंनदधेतितुहृचोग्निस्तंतुमाद्याजगत्योष्टमीचडल्वं
तत्रनवर्चंद्वितीयादिष्वनुस्वन्तम्: विश्वेदेवा: शास्त्तेनेत्युत्तरसूक्तंषळृचमुत्तरसूक्तंचैकादशाकमिति षोडशदेवानांषळ्
ऋचमिति ऋचेदशाग्निवाक्यं तंत्रेनाअसुज: प्रथमाद्याः पंचर्चः यमेछामिवाक्यं तत्रषोडशाक्तनदधेवाचः प्रथममित्या
द्योद्वचोग्निर्वाक्यं अत्रचमहत्तदुल्बमित्यादिसूक्तत्रयवत्तिन्योत्रिष्टुभः तत्रतृतीयसूक्ते एकादशर्चेतंतुतन्वमित्यादिज
गत्यः तत्रापिसूक्तस्याष्टमीत्रिष्टुप् अग्न्युक्तिदेवदेवस्यादेवोक्तिस्त्वग्निदेवत्या नात्रगुरुलाघवंचोदनीयं ब्राह्मणानुकर
णात्वात् इत्युत्तरमित्यादिव्यतिरिक्तत्वमस्ति नाकषट् बृहदुक्थोवामदेव्यः ते बृहदुक्थानामवामदेव्यः गर्गादिभ्योय
ञ् त्रिष्टुबिंद्रः हरिष्टौ तन्नामवामदेव्योबृहदुक्थ्यस्त्रिष्टुबिंद्रः इतदंतेसप्तवैश्वदेवंतुचतुर्थ्याद्यास्तिस्रोजगत्यः एकं
वैश्वदेवमिदमुत्तरंच चतुर्थ्याद्यास्तिस्रोजगत्यः इतिलाघवायोक्तं चतुर्थीपंचमीषष्ठ्योजगत्यइतिगुरुः तिस्रइतिचस
प्तमीमाभूत् आदौसप्तमीचात्रस्तिस्त्रिष्टुभस्तिह बृहदुक्थ्यवामदेव्यऋषिः अथमाप्रगामेत्याद्युत्तरसूक्तचतुष्टयस्य
ऋषिमाह पराणिचत्वारिसूक्तान्युक्ताऋषयोद्विपदेवत्रिमंडले अग्निदृष्टेपंचमेमंडले अबोध्यग्निः समिधेत्यादौद्विपदे
द्विपदासूक्ते अग्नेत्वन्नोअंतमइति अत्रऋषयोग्नेत्वंगोपायनलोपायनवाबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चेत्येवमादः
पऋषयपराणिचत्वारिसूक्तान्यपश्यन्निति शेषः   अथकथयन्नेवसूक्तचतुष्टयस्यज्ञातव्यंसर्वमाह अथैक्ष्वा
कोराजासमातिर्गोपायनानो बंध्वादीन्पुरोहितंस्त्यक्त्वान्योमायाविनौअग्रेष्ठमौमत्वापुरोदधे तमितरेक्रुद्धाअभिचर
थनोमायाविदौसुबंधोःप्राणानाक्षिपतुरथास्यभ्रातरस्त्रयोमाप्रगामेतिषट्कंगायत्रंस्वस्त्ययनंजप्त्वायत इतिद्वा
दशार्चमानुष्टुभंमनआवर्तनंजेपुः प्रतारीतिदशर्चंचतस्रोनिर्ऋत्यपनोदार्थेलेपुश्चतुर्थ्यांसोमचास्तवन्मुत्योरपग
मायोत्तराभ्यांदेवीमसुनीतिं अनुमतइतिपादामतिरित्येके सप्तम्यांलिंगोक्तादेवताः द्विष्टाभिःपंक्तिःर्महापंक्तिपंन्त्यु
त्तराभिर्द्यावापृथिव्यो: समिंद्रेत्येनीइंचाश्चैंनाजनमितिद्वादशार्चमानुष्टुभंचतसृभिरसमातिमस्तुवन्पंचम्यैंद्रंषष्ठ्या ५७

215
1916

गस्त्यस्वमामांतेषांराजानमस्तौत्परांभिः सुबंधोर्जीवमाहृयन्तंस्यथालभ्यसंज्ञमस्यशानुपंचाद्यागायत्र्योष्टम्याद्येपंक्ती
अथहकलुपुरा ऐक्ष्वाकः इक्ष्वाकुपुत्रः इक्ष्वाकोरपत्यं: दाडिनेतिद्वञो: निपातने राजासमातिर्नामानात्रैक
र्चालोपायिनकस्मर्तव्यः अपितुगोपायनमेधेतिचक्रुंगोपायनानिति पूर्वमामनेचत्वानू बंध्वादीन् बंधुःसुबंधुःश्रुतबं
धुर्विप्रबंधुश्च स्यक्त्वा अन्योनौकिरातानकुलीतिबृहद्देवतोक्तनामानौमायाविदौश्रेष्ठतमौ श्रुत्वापुरादधे पुरोहितत्वेनवृणी
ते नमसमातिमितरेबंध्वादयः अभिचेरुअभिचेरितितंतः अतएकइत्यध्येरितिएत्वंअभ्यासलोपश्च अथतावपिनवपु
रोहितौमृत्वेति बृहद्देवतायिदः प्राणांजीवितंपुंसिभूम्न्यसवः प्राणाइतिनैघंटुकः आचिक्षिपतुः आद्यवयतांपिक्षेसमोक्षि
सित्यत्वपुत्रकथानि अथानंतरंहेतिखेदेअस्यमृतस्यसुबंधोर्भ्रातरस्त्रयः बंधुःश्रुतबंधुर्विप्रबंधुः माप्रगामपथेवयंष
ट्कंगायत्रंस्वस्त्ययनंअविनाशप्राप्तिहेतुंवैश्वदेवं जप्त्वाजपित्वा छंदसादित्वाहततोयत्तेयमंवैवस्वतमिति द्वादशार्चमा
नुष्टुभंमनमोजीवितस्यपुनर्देहप्रविशनहेतुंमनोदेवत्यंजेपुरितिचक्रेपरिति वदंति ब्रूयात् किंच प्रतार्यायुः प्रतरंत
वीयइत्यग्रादशर्चेसूक्ते आदितश्चतस्रोऋचोनिर्ऋत्यपनोदार्थेहि देहात्प्राणानत्यावयंतीतिदेवतानिर्ऋतिः तंनिवृ
त्यर्थंजेपुः तत्रचतुर्थ्यांमोषुण: सोमेत्यस्यांनिर्ऋतिनिवृत्यजपंतएवसोमस्तुवन् मृत्योर्निवृत्यर्थंउत्तराभ्यामसुनी
तेमनइत्याभ्यांपंचमीषष्ठीभ्यांअसुनीतिनाम्नीदेवीमस्तुवन् सप्तम्यांलिंगोक्तदेवताः पृथ्वीसोमपूषापस्त्यास्व
स्त्याख्याअस्तुवन् इति आदितःसप्तत्रिष्टुभः आथाष्टम्यादिभिःशिष्टाभिःस्तुभिःपंक्तिर्महापंक्तिउत्तराभिर्द्यावा
पृथिव्यावस्तुवच्च सामिंद्रेरयमामित्यनेनार्धर्चेनइंद्रंद्यावापृथिव्यौवाद्वेअस्तुवन् तत्रशंरोदसीत्यष्टमीपंचाष्टकापं
क्तिः अवद्वकेअवेतिनवमीअष्टकामहापंक्तिः समिंद्रेरयेतिदशमीपंक्त्युत्तरा आद्यैकादशाकावष्टकास्त्रयःपं
क्त्युत्तराइत्युक्ताएकाधिक्यात् पुरिग्विशेषेणयंवेदितव्यं आजानंत्वेषसंदृशमिति द्वादशार्चमानुष्टुभे आदितश्चतस्र

०भा०
५८

सिरसमानिरानानमस्तुवन्यदसित्यारात्क्रबंधोर्मृतिः सर्वमूलभूतेशक्तिप्रसन्ने सर्वं प्रसन्नं भवेदिति अथेंद्रस्य त्रेतिपंचम्येंद्रमस्तु
वन् अगस्त्यस्यनप्त्यइतिबध्यागस्त्यस्वस्वसा रूपांबंध्वादीनांमातागानमसमातिस्तपुत्रार्थमुग्रेंद्रंहार्थमस्तौत् परातिरस्मंमा
नायंपितेत्यादिभिः पंचभिः सुबंधोमृतस्यशयानस्यजीवंजीवितं यमसुपाह्वयन् आह्वयत अर्थात्यया द्वादश्या अयंमेहस्त
इत्यनया हस्तस्पृतिमुपलब्धसंज्ञंलब्धप्राणं सुबंधुमस्पृशन् पृष्टवंतः अत्रानुष्टुभि द्वादशर्चे सूक्ते आद्याः पंचगायत्र्यः अ
ष्टम्याधुपयायुगंचरत्रथस्य समीयथेयंपृथिवीमहीतिनवमी बृहत्पंक्ती अत्रगोरवंचोदनीयचत्रासुपरागास्यानि प्रायेणात्रप
ध्यंतइति इदमित्थासप्ताधिकानाभानेदिष्ठोमानवोवैश्वदेवं वैतत् रौद्रं सप्तविंशतिः नाभानेदिष्ठोमानवः इदं वैश्वदेवं
उत्तराणिपंच सर्वास्त्रिष्टुभः ८ १ येयज्ञेनैकादशाद्याः षडंगिरसांस्तुतिर्वासा त्रिष्टुप्पंचम्यनुष्टुप्प्रगाथोनुष्टुभौ गा
यत्रीचतस्रोस्याः सावर्णेर्दानस्तुतिः दक्षिणयाद्याः षडंगिरसांस्तुतिर्वा वैश्वदेवं एवचाश्रूयतेहि इदमित्थारौद्रंमूर्तव
चाथेयज्ञेनदक्षिणयासमक्ताइतिवैश्वदेवं नाभानेदिष्ठशंसनीति अत्रचांसासहस्रदाग्नामणीरित्येकादशी त्रिष्टुप् विरूपा
सइतिपंचम्यनुष्टुप् अतः परं प्रगाथ एकः षष्ठी बृहती सप्तमी सतो बृहती अष्टमी नवम्यानुष्टुभौ अथदशमींगायत्री प्रस्तु
तंजायनामित्याद्याश्चतस्रः सावर्णमहाराजस्यदानस्तुतिः आदीचतस्रोजगत्यः नाभानेदिष्ठः सप्तम्यानित्यं विश्वेदेवाः प्र
णवनः स्यूनागयः प्लातोदित्रिष्टुबंतं तु स्वस्तिनस्त्रिष्टुप् महोअरया पथ्यास्वस्तिदेवता येदिधिषेत सप्तदशगयोनामप्ला
तिपुत्रः ननु प्लुतस्य गयाप्लतेः सूनुरवीवृधदइतिलिंगात् प्लातच बननात्सामग्नेगयइतिगयस्यापि प्लातत्वं माभूत् द्वित्रिष्टु
बंतं तु त्रिष्टुभांतेमस्यतत् इदमुत्तरंचस्वस्तिनस्त्रिष्टुवात्रिष्टुबंतन्यायेन जगतीशासास्वस्तिनः पथ्यास्विसेषा पंचदशी
सहोतरचास्वस्तिरित्येत्यनयासह पथ्यास्वस्तिदेवता उभे अपि यथा स्वस्तिंदेवत्येत्यर्थः श्रूयतेहि स्वस्तिनः पथ्यासुधन्वसुस्व
स्तिरित्यप्सु पथ्येऽश्वे छोनिश्चयंति यंति पथ्यायास्वस्तित्रिष्टुभावितिशिष्टाश्चतुर्दशानित्यं जगत्यः विश्वेदेवाः परावतोयेदिधिषंत
आप्यमितिवैश्वदेवमितिश्रूयते कथायामेत्रिष्टुप् देवानांद्वित्रिष्टुबंतं यामेधिषं मरुतइत्येषात्रिष्टुप् जगत्यपवादः शिष्टाश्चतुर्द ५८
शजगत्यः प्लातोगयोविश्वेदेवाः अग्निरिंद्रः पंचोनावसुकर्णोवासुक्रस्त्रिष्टुबंतं तु वरुणः पंचदश वसुकर्णोनाम वसुक्रपुत्रः द्वित्रि

217
1916

ष्टुभावंतेचस्य तदिदमुत्तरं च आदितश्चतुर्दशजगत्यः विश्वेदेवाः देवान्हुवेपंचोना बृहदुक्थवसः वासुक्रोवसुकर्णः आदितस्त्र
योदशजगत्यः अंतेद्वेत्रिष्टुभौ विश्वेदेवाः श्रूयतेहि देवान्हुवेबृहदुक्थवसः स्वस्त्यय इतिवैश्वदेवं इतिवैश्वदेवाधिकारः समाप्तः
इमांधियंद्वादशायस्योवाहेस्प्रसंतु सप्तदशीर्वा अयास्यानामांगिरसः बृहस्पतिदेवत्यमिदमुत्तरंच त्रिष्टुप् उदप्रुतोद्वादशन
वयः आंगिरसोयास्यत्रिष्टुब्बृहस्पतिः भद्राः सुमित्रावाध्र्यश्व आग्नेयं द्विजगत्यादि द्वादश अग्नेः सुमित्रोनामवाध्र्यश्वपुत्रः अग्नि
देवत्यं द्विजगत्याद्यंचास्यनत्र अथदशत्रिष्टुभः इमांमएकादशाग्नेआप्रमितिसूक्तेआप्रीदेवतास्तद्वितीयस्तनूनपाद्वजेन
स्यानेनराशंसः वाध्र्यश्वसुमित्रस्त्रिष्टुप् बृहस्पते बृहस्पतिर्गानंतुष्टावनवमीजगती एकादश प्रथमं बृहस्पतिर्नामांगिर
सः नवमीइमयेनावांगिर्जगती शिष्टादशत्रिष्टुभः शानंस्तूयते तुष्टावेत्यनुक्रमण्यानुकरणं उक्तंहि बृहद्देवतायां यज्योतिःपर
मंब्रह्मयद्यागासमुपाश्नुते तंज्ञानमस्तितुष्टावसूक्तेनाथ बृहस्पतिः ५८ अध्यायः देवानांनवलौक्यो वा बृहस्पतिर्दाक्षायण्य
दितिर्वादेवमानुष्टुप्ससुवये बृहस्पतिर्लौक्यः लौकनाम्नापत्यमितिगर्गादिभ्यो यञ् अथवांगिरसएव बृहस्पतिः अथवादाक्षा
यण्यदितिऋषिका दाक्षायनयञ् स्वार्थेयञ् अतो ङीप् गोत्रचरणैः सहेति जातित्वं देवदेवत्यं नवाप्यनुष्टुभः जनिष्ठा एकादशगो
रिवीतिः उग्रः गौरिवीतिर्नामशाक्त्यः अर्थमापंचोनागौरिवीतिः शाक्त्य इत्युक्तं श्रूयतेहि गौरिवीतिर्ह वैशाक्त्यो नेदिष्ठमिति त्रि
ष्टुबिंद्रः वस्रूनोयद्वा शाक्त्यो गौरिवीतिस्त्रिष्टुबिंद्रः प्रसुनवसिंधुसिंधुक्षित्प्रैयमेधो नदीस्तुतिः जगतं तु प्रसुव आपः सिंधुक्षिन्ना
मप्रियमेधपुत्रः नद्योऽस्तत्यं आगतमिदमुत्तरंच आनोदेवासर्पऐरावतोजरत्कर्णोग्नाव्यो स्तौत् ऋं जसे सर्पाजातिः जरत्क
र्णोनामऐरावतपुत्रः स्रावाः अभ्रप्रुषः स्यूमरश्मिर्भार्गवो मारुतंतु पंचमीजगती न अष्टौ स्यूमरश्मिर्भार्गवः मरुद्देवत्य
मिदमुत्तरंच अत्रपंचमीजगती शिष्टात्रिष्टुभः विप्रासो द्वितीया पंचम्या द्याश्चतिस्रो जगत्यः न अष्टौ द्वितीयपंचमीष
ष्ठीसप्तमीचतस्रोजगत्यः आद्यानृतीया चतुर्थ्य स्यत्रिष्टुभः स्यूमरश्मिर्भार्गवो मारुतं अपश्यंसप्तसौचीकोग्निर्वैश्वा
नरोवामप्तिर्वावाजंभर आग्नेयंतु अस्यअग्निर्नामसौचीकगुणो वैश्वानरगुणोवा अथवासप्तिर्नाम वाजंभरपुत्रः आग्ने
यमिदमुत्तरंचत्रिष्टुप् अग्निं सप्तिं सप्त सौचीकोवैश्वानरोग्निर्ऋषिः वाविशिष्टत्वान्नसप्तिः त्रिष्टुबग्निः यस्माविश्वाविश्व

कर्मा भौवनो विश्वकर्मणं तु सप्त विश्वा विश्वकर्मा सौवनोः भुवननाम्नः पुत्रः विश्वकर्मदैवत्यमिदमुत्तरं च अग्निरिति प्रकृतिभावः मन्यु
षः सप्तापि ना भौवनो विश्वकर्मा ऋषिः त्रिष्टुब् विश्वकर्मा देवत्यं यस्ते मन्यो मन्युस्तापसो मा न्यवतु जगत्यादि सप्त अविधुन्मन्युर्ना
म तपसः पुत्रः मन्युदेवत्यमिदमुत्तरं च आद्या जगती द्वितीयादिषट् त्रिष्टुभः त्वया मन्यो चतुर्जगत्यंतं सप्त सरथं आदौ तिस्रः त्रि
ष्टुभः तथा च तन्मा जगत्यः तापसो मन्युः मन्युदेवत्यं सत्येन सप्त चत्वारिंशत् ल्याविभीः सूर्या त्वदेवतमनुष्टुभं पंचम्यः सोमम स्तोत्र
गाभिः स्वविवाहं स सदृश्यादेवान् परस्या सोमार्कौ परस्या च इमसं परान्तरा विवाह मंत्रा आशीः प्रायाः परादेहि देव धूवासः संस्पृ
शं द्वाभ्याम् परायस्य नाशिनी दंपत्योर्न वो नवा त्रिष्टो नक्षत्रा ग्न्या मीति निर्द्वे देयदश्विना पूषा घोरचक्षुरिति त्रिष्टुप्शत्रिष्टुसुरी बृह
ती पूर्वापरस्मिह प्रियमानः प्रजां जगत्यः उतासिता सूर्यानाम ऋषिकासा सवितुः कन्या आत्मा देवत्यं सोमाय पंचादौ च आनुष्टुभं
सूक्तं अपश्यदिति सूक्तशेषः अत्र चादितः पंचभिः सोमं स्तुवंति अतः पराभिः पद्मादिभिः एकादशाभिः स्वविवाहं स्तौति अथ
सप्तदश्यादेवतानस्तौति परस्या अष्टादश्यासोमार्कौ अस्तौत् परया एकोनविंश्या चतस्रभिर्नवो नवो भवति इत्यनया चंद्रमासमस्तौत् परास्त्रि
भिः ऋग्भिस्त्रिंश्या यान वनृणां मनुष्याणां प्रायेण विवाहमंत्राः विवाहमंत्र आशिषश्च भवंति ततः परादेहि शामुल्यं अश्रीरा तनूर्भ
वतीति देवश्चाति गाह कालपरिहितवासस्यः स्पर्शस्तस्य मा विनो आमाविनो विवाहकालपरिहितं वासो न पुनः द्रष्टव्यमि
त्याहुरित्यर्थः अयं येव धन्वं इव हनुमितिदं पत्योपक्ष्मणोरीगस्य नाशिनी मा विदन्निति दंपत्योः स्तुतिः नवो नवइत्याद्याप्ति
स्त्रो नक्षत्रा ऋग्वदतिहि गृभ्णामि न इतिर्दिष्मद श्विना पृच्छमाना पूषा त्वेतो नयतु अघोरचक्षुरिति दशत्रिष्टुभः तृष्टमेतत्कटु
कमित्युरो बृहती अष्टक द्वादशाकृदयवती पूर्वापरं चरतइह प्रियं प्रजया आ नः प्रजां जनयतु इति तिस्रो जगत्यः शिष्टास्त्वनु
ष्टुभः नवो नवइत्यादि पोडशास्तस्य देवत्याः अध्यायः विहि स्वधिकैं इंद्र वृषाकपिरिंद्राणी इंद्रश्च सम्मूदिरे पांक्तं सो
न्निंशदनुष्टुभः नवो नव इत्यादि पोडशा सूर्य देवत्याः अध्यायः विहि इंद्राणीन्द्रपत्नी प्रयोगादन्यतरस्यामिति इंद्रवरुणेनीति
नाः श्रमो विंशतिः वृषाकपिर्नामेंद्रस्य सूनुः शची सपत्नी जातः इंद्राणीन्द्रपत्नी प्रयोगादन्यतरस्यामिति इंद्रवरुणेनीति
डिःप्यानुक् इंद्रश्च स्वयमितित्र यसम्मूदिरे संहत्यउदिरे विवाहं ऋतवंतः विमतो हि वदं वो न इ: भासनो परसंभाषाति तस्येव
वियजादित्वात् संप्रसारणं पंचपदया पंक्त्या व्याप्तं उपदेशो घनुक्तेभ्व च ऋ भेदेन दर्शितः अथाप्यर्थादिशानार्थ मर्थनं

५९

219
1916

स्व ब्रवण्यते विहिसौ तोः इत्याद्येंद्रस्य वाक्यं पराहींद्रकिमयं तां यमिम प्रियान स्थानिन मस्त्रीति पंचेंद्राण्याः उवे अंबे निवृषा
कपे किंसुबाहो इत्येंद्रस्य अवीरामिव मां संहीत्रमितिद्वे इंद्राण्याः इंद्राणी मास्तुना हमिंद्राणीतिद्वे इंद्रस्य वृषाकपायीति वृषा
कपोः उक्ष्णो हींद्रस्य वृषभो न न संत्रोयस्य रंवनेनसंवोयस्यरोमशोमयमिंद्रेति च न सत्त इंद्राण्याः अयमेमि धन्वच पुनरेहि यद
दं च न स तइंद्रस्य पर्शुर्ह नाम्येत्यं साग्रयाविंशौ वृषाकपेरिति नौ तु वार्षाकपं वृषाकपिं शंसतीत्यादि तु एकदेश ऋग्याहास्यस
क्त व्यवहारः रक्षोहणं पंचाधिका पायुराग्नेयं राक्षोघ्नं चतुरनुष्टुबंतं वाजिनं पंचविंशतिः पायुर्नाम सारद्वाजइत्युक्तं रक्षोहे
त्यग्नेर्गुणः रक्षसां हंतात्मग्निरत्र स्तूयते इत्यर्थः आदवेकविंशतिस्त्रिष्टुभः परित्वाग्ने पुरं वयमित्याद्याश्चतस्रोनुष्टुभः ह
विष्कंगिरसो मूर्धन्वा वामदेव्यो वा सोर्यवैश्वानरीयं पांतं एकोनविंशतिः मूर्धन्वा नाम अस्य गोत्रं किल्व्यपते आं
गिरसो वा मदेव्यो वेति आंगिरसेनु त्वसि ध्येपा युमर्त्या मानुष्व इति असत्यस्मिन्मूर्धन्वा वामदेव्यावेत्युक्तेः पायुर्भारद्वाजो वे
ति प्रसज्येत सोर्य वैश्वानरीयं सूर्य देवत्यं वैश्वानरगुणदेवत्यं चे वक्तुं समासनिर्देशात्त्रिष्टुप् इंद्र स्तव कूनोरेणुः नूतमं
अष्टादश रेणुर्नाम वैश्वामित्रः नोविश्वामित्रावितित्रिष्टुब्बिंद्रः सहस्रशीर्षा षोडश नारायणः पौरुषमानुष्टुभं तंतु पुरुषः
नारायणनामास्य गोत्रमुपदेशेषु उक्तेः यथोपदेशमितिसूक्तं पौरुषं पुरुषदेवत्यं इतिहासादि सिद्धोऽयं पुरुषः पंचविं
शिकः उक्तं हि इतिहासादि सिद्धोऽयं पंचविंशतिकः पुमान्स्तत् इह योग्यतया स्तुत्यो जात्या जाति पुरुषोश्च वदंति अनु
भमिति अगस्त्यपवादः त्रिष्टुबंतमिदमुत्तरं च संजागृवद्भिः पंचैनारुणो वीतहव्य आग्नेयं जरमाणः पंचदश अरुणा नाम
वीतहव्यपुत्रः अग्निदेवत्यं त्रिष्टुबंतं यज्ञस्यशार्यातो मानवो वैश्वदेवं तु जगतं पंचदश रथ्यं शार्यतो नाम मनुपुत्रः वैश्व
देवमिदमुत्तरं च जगती छंदस्कमिदं श्रूयते हि यस्यैवं तो रथ्यं विश्पतिं विशामिति वैश्वदेवमित्यारभ्य तद्द्वाशायोतमित्यं
तं महिनात्रः पार्थ्यः प्रस्तारपांक्तं पुरस्ताद्बृहत्यंतं त्रयोदश्युपाद्ये चानुष्टुभोनवम्य क्षरैः पंक्तिरेकादशी न्यंकुसारिणी पंचो वा
द्यावापृथिवी नाम्नो नाम पार्थ्यः पृथिवीपुत्रः पृथोरपत्यार्थे ण्यन् द्विर्द्वादशकपाद्यष्टकप्रस्तारपंक्त्या व्याप्तं उत्तरपद
वृद्धिश्छांदसी पंचदशी पुरस्ताद्बृहती आद्या द्वादश्यष्टक अंते यस्य तत् त्रयोदशी एकाद्वितीया तृतीया चत्रिस्रोनुष्टुभः

सं०भा०
६०

ऽभीनोअङ्कयइतिनवमीअक्षरैः पंक्तिः नतु पादैः तथाहि नेयं पंचाष्टका एकादशीन्यंकुसारिणी अष्टकद्वादशाद्यष्टकवतीवि
श्वेदेवाः प्रैतेषकूनामर्षोबुदः काद्रवेयोग्राव्णोस्तोत्रमपश्यत्सेत्रिष्टुभोपंचमीच चदंतु चतुर्दश सर्पोजातितः अर्बुदोनामतः
काद्रवेयः स्त्रीभ्यो ढक् ढलोपेकाद्रुइतिनिषेधात् ग्रावाणः ध्यन्वे अल्लोपः पंचमीसप्तमीचतुर्दशीत्रिष्टुभः अंत्यापंचमी
सप्तमीत्रिष्टुभइतिनोक्तं विशेषणाभावात् तथाउक्तेवं किमितिचेत् शिष्टंसाशोयं शिष्टाएकादशजगत्यः ८ ४ हये
घूनोर्वशीमिळः पुरूरवाः पूर्वोषितान्कामान्पुनरासाद्यवरीत्युमेच्छत् सातमनिच्छंती प्रत्याचष्टे हयइषुर्या कदासदेवोंतरिक्ष
प्रांसवेतितिस्रः श्वेडवाक्यशेषाउर्वश्याःजाये अष्टादशउर्वशीनामअप्सराः ईळेच मनोःपुत्रस्यैळ रुद्राणीशापात्स्ति
त्वंप्राप्य येषंते उमास्वस्त्रीत्वस्यस्त्रीत्वकालेतुबुधेनजनितःपुत्रः पुरूरवानाना मम हारा जा पूर्वोषितान् स्वनगरे प्रतिष्ठा
नाख्ये चत्वारिवर्षाणिकृतवासंत्वसमयगर्भादात्मानंत्यक्त्वागतवतीइतश्चकामादस्यंनाभिलाषादन्वेषणंकुर्वन् कदाचि
न्मानससरस्तीरेदृष्ट्वादामासाद्यपुनरपिस्वप्रसादेवरीत्युमासादयितुमैच्छनूतीतुराज्ञानूकृतवान् सा चोर्वशीतेनप्रार्थ्य
माना अनिच्छंतीनिस्पृहा प्रसाचष्टे प्रत्यभाषणं कृतवती नेत्यपोक्तं मया करिष्यत इति हयेजाये इषुर्नश्रियइषुधेः सुयो
जूर्णिः कदासुनुः सदेवो अद्य अंतरिक्षप्रांरजसइतिसचायदामजहतीषितायाप्तिस्त्रश्चेतिनवरैकस्पपुरूरवसो वा
क्यं शिष्टानव अन्याउर्वश्यावाक्यं एकवाक्यमिसुपसमत्वामित्यपेक्षार्थसंबध्यते अष्टादशत्रिष्टुभः यस्यवाक्यंसऋषि
र्यातेनोक्तंतेसादेवता एकोर्वशीतिहासोत्रविस्पष्टार्थोयप्रवर्ण्यते मित्रश्चवरुणश्चोभौदीक्षितौप्रेक्ष्यचोर्वशींच
लितौवनद्युक्तेश्चकुंभेनिहितरेतसौ तांशप्तवंतौमानुष्यभोग्यभूम्यांवसेतिहि अत्रांतरइलोराजा मनुपुत्रश्चसंयुतः
मृगयांसंचरन्स्वश्चदेवीक्रीडन्विवेशह यत्रदेवीगिरिसुतांसर्वैर्भावैरतोषयत् अत्राविशन्पुमान्स्त्रीस्यादिसुत्तया
तत्रचाविशन्स्त्रीभूताक्रीडितोभोगाच्छरणंशिवमंजसा इयंप्रसाद्यतांराजन्नित्युक्तः सोधुनानृप जगामशरणंदे
वीआत्मनःपुंस्त्वमिच्छये अकरोत्सानृपंदेवीषण्मासास्त्रीत्वपुंस्त्वकं ततः कदाचित्स्त्रीकालेबुधःसौंदर्यमोहितः ६०
अप्सरोभ्यो विशिष्टांतामिळांतांनपयोषितां तत्रेळायांसोमपुत्राज्जातोराजापुरूरवाः तमुर्वशीतुचक्रमेप्रतिष्ठानग

221
1916

रीस्थितं तदन्यांचनधानन्या दृष्ट्वायामितयागता सूतावरुणयोकस्यसमीपंकुरुनेद्रनं इतिसासमयंकृत्वारमयामासतं
नृप चतुरब्दे गतेराभौ देवैरुरुणकद्वयं हृतं तस्यध्वनिंश्रुत्वा नग्नएवसभूपतिः उत्थायजित्वा वागच्छेत्स्येवंजल्पतिकोन्यतः वि
द्युतादर्शितोद्धस्यैनग्नएवपुरूरवाः अथसाहृष्टसमयाउर्वशीतुदिवंययौ ततउन्मत्तवद्राजा दिदृक्षुस्तामितस्ततः कुर्वन्नन्वे
षणंतीरिसरसोमानसस्यतां विहरंतीमप्सरोभिःसहापश्यन्पुरूरवाः पुनः सचकमे भोकुमुर्वशीं चपुरूरवाः साश्वःसपश्य
द्भुत्का चप्रसाचष्टेप्रजेति तां इत्युर्वश्यैकसंवादमिममेषाप्यसूक्तयत् प्रतेसद्योनावरुः सर्वहरिर्वेंद्रोवाहरिस्कतिस्त्विस्त्रि
ष्टुबंतं महं त्रयोदश बरुर्नामांगिरसः अथवासर्वहरिर्नामसत्वेंद्रः इंद्रस्यपुत्रः हरिस्कतिः हरिरितिइंद्राश्वस्यनाम एका
दशीहैंदशीत्रयोदशीत्रिष्टुभः अंतेयस्यतत् आद्यादशजगत्यः वरीरोहेतभ्महासूक्तंचजागतंचेति श्रावण्यंजगती
मयत्वात् याओषधीत्र्यधिकाथर्वणोभिषगोषधीस्तुतिरनुष्टुभंत पूर्वाजाताः त्रयोविंशतिर्भिषकूनामअथर्वपुत्रः
अनितिन्नकृतिभावः ओषधयोत्रस्तूयंते अनुष्टुभः सर्वाः बृहस्पतेद्वादशार्ष्टिषेणोदेवापिर्वृष्टिकामोदेवांस्तुष्टाव प्रति दे
वापिर्नामऋष्टिषेणपुत्रः देवान् बृहस्पतिमित्यादीनूष्टिकामः सस्यहत्यत्येस्तवान् त्रिष्टुप् कुभोवम्रोवैखानसःद्वाद
श विंत्रं वम्रोनामविखानसपुत्रः त्रिष्टुबिंद्रः इंद्रदुवस्युर्वंदनोवैश्वदेवंत्वंसात्रिष्टुप् दस्यद्वादश दुवस्युर्नामवंदननाम्नः
पुत्रः वैश्वदेवमुत्तरंच आद्यावेकादशजगत्यः अंत्याद्वादशीत्रिष्टुप् उद्बुध्यत्वं बुधःसौम्यऋत्विक्स्तुतिर्वानवम्यंत्येजग
त्यौ पंचमीबृहतीगायत्र्योर्मध्ये द्वादश समनसः बुधोनामसोमपुत्रः पितरोदेवता चदुपचारा सौमायणऋत्विक्स्तु
तिर्वा वैश्वदेवाबृहस्पतिर्देवतायामुक्तेर्देवतानुक्रमण्यां वैश्वदेवोक्तेश्चविकल्पउक्तः अबोधियंपज्ञियामितिनवमी
कृपृन्नरइत्यंतेनचद्वेजगत्यौ विराहावानितिपंचमीबृहती गायत्र्योर्मध्येपंचमी बृहतीसतीगायत्र्योसीरायुंजंतीतिचतु
र्थ्या इंद्रकृताहावमिति षष्ठ्याश्चमध्येतिघतीति अतिकोशलमिदमावीर्यस्ययदुक्तं चतुर्थ्यषष्ठ्यो गायत्र्योपंचमीबृहतीति
वाच्यं एवं ब्रवीतीति शिष्टासप्तत्रिष्टुभः प्रतेमुद्गलोभार्म्यश्वोद्रुघणेनऋषभेणाजिंजिगायेतिद्रोघणंवाधानृतीयांसा

बृहस्पः रथं द्वादशा भार्म्यश्वः भर्म्यश्वनाम्नः पुत्रः मुद्गलः साहवर्यस्यद्रुघणेन मुद्गलेन ऋषिणा बलिवर्देन आजिं युद्धं जि
गाय जितवान् सन्निवेशोऽयमिति कृत्वं इतिहवो अत्रोहितोद्रुघणदैवत्यः वेसुक्ते रेंद्रं वा आद्या अं तर्य छेति तृतीया त्वं विश्वस्मि
त्सं स्यादा द्वादशीनितिस्त्रो बृहस्पः शिष्टान्वत्रिष्टुभः मुद्गलस्य ह गावश्चौरैस्सुक्ताजरद्गवं शिष्टं स्वशकटे स्वायुक्तेव
ऋजुराहवं द्रुघणं युयुजे तत्र तोलमार्गानुसारकः द्रुघणं वाग्भृतः क्षिप्त्वा चौरेभ्यो जगृहे स्वगाः इतिकथात्र वसूचिता आ
शुः स्फोनेन्द्री प्रतिरथः चतुर्थी बार्हस्पत्या सानुष्टुप् मारुती वा शिष्टाः त्रयोदश अप्रतिरथो नाम इंद्रपुत्रः बृहस्पतेर्प
रिदीयार्थेनेति चतुर्थी बृहस्पति देवत्या अमीषां चित्तमिति सुपर्णा अंसा द्वादशी आद्या देवी अथर्वण्या ता देवी अधि
कारिणी अत्रस्तूयते मनोरेंद्र वाश्वेति कृपाभावः छांदसं । प्रेताजयता नर इत्यनुष्टुप् मारुती ऐंद्री वा आदितो द्वादश
त्रिष्टुभः चतुर्थी द्वादशी त्रयोदशी वर्जं नित्यदर्श ऐंद्रः असाध्यैकादशाष्टकोवैश्वामित्रः सोमः अष्टको नाम वैश्वामित्रः
पुत्रः श्रूयते हि विश्वामित्रपुत्रं नामंत्रयामास मधुछंदाः श्रृणोतन ऋषभो रेणुरष्टक इति त्रिष्टुब्विद्रः । कदाको लो दुर्मित्रो
नाम्ना सुमित्रो गुणतः सुमित्रो वा नाम्ना दुर्मित्रो गुणत ओषिहं हरीव अपिपीलिक मध्ये त्रिष्टुबसावाद्या गायत्री वा व
सो एकादश कुत्सपुत्र नाम्ना दुर्मित्रः दुर्मित्र इत्यस्य नामेत्यर्थः सुगुणतः सुमित्रः एषु अयमेव सुमित्र गुणयोगात् एतद्वि
परीतं नाम्ना सुमित्रो गुणतो दुर्मित्र इति इन्द्रं न गुणान्यस्य मित्राणि बहुगुणत्वादिति विकल्पश्च लिंगात् शतं यदसु
र्यं प्रति त्वे स्यस्याः सुमित्र इत्थासीो दुर्मित्र इत्थासीो दिलस्यान वधारणं अपानुक्रमण्यां चानएव विकल्पः दुर्मित्रो वा सुमि
त्रो वा कौत्सः कदा वसो न यपि नो दुर्मित्र सुमित्रो वेत्येषोपास्थिते वेन्नाम्ना दुर्मित्रनाम्ना स्तोतृत्वे सुमित्र नाम्ना स्तोतृत्वयो
गात् ऋगर्थस्य संबंधनामा प्रज्ञादित्यन्यतरस्यां गुणतये वयोगो वान्य एवेति हि मन्यते इदं वो ओषिहं हरीयस्य सयुजीव
त्वं यम्यक इति द्वे पिपीलिक मध्ये एकादशाषट्के कादशक इत्युष्णिग् अधिकारजनता अनुष्टुप् बृहत्यधिकारे कुत एतत्
ओषिहमि सानुबुध्यगुसंधानाच्च साहचर्याच्च साहचर्यमप्यथे नियमाय विरामश्च द्वौ हि इत्सं लक्ष्मणकृतं त्रणसाहचर्या
प्रियं कृ तारमया का सतं तपं चतुरश्रृंगतरात्रौ देवैरे रणकृद्यं हतं तस्य ध्वनिं श्रुत्वा नग्न एव सभूपतिः उत्थाय जित्वा वा गच्छेः

223
1916

त्रेवतीरमण आनर्द्धः कांनआमदन्यं वा अबोधयति अंत्याएकादशीद्वानं वायदसर्यप्रतिर्वेति त्रिष्टुप् आद्यागायत्रीउष्णिग्वा वृहेन
ओषिहमित्यादि शिष्टा अगस्त्यपवादः ५ अध्यायः उत्तो भूतांशः काश्यपआश्विनं एकादश नूनं भूतांशो नामकश्यपपुत्रः अश्वि
देवत्यं त्रिष्टुप् आविर्दिव्योदक्षिणा वा प्राजापत्या दक्षिणानत्वान्तृत्वास्तो चतुर्थी जगती एकादश अमृत दिव्यो नामांगिरसो ऋ
षिः दक्षिणा वा प्रजापतेः सुता ऋषिका दक्षिणाय जमाने ऋत्विग्भ्योदीयमानानद्दातृन्दक्षिणा या दातृनूयजमाना न्वास्तौत् याजका
दित्वात् याजकाभ्यामिति षष्ठीसमासः शतधारवायुमर्कमिति चतुर्थी जगती शिष्टा दशत्रिष्टुभः किमिच्छंती पणिभिरसुरैर्निगूढा
गा अन्वेष्टुं सरमा देव शुनी मिंद्रेण प्रहितामयुग्भिः पणयो मिथ्यंतप्रोचुः सानान्युग्मा स्वा भिरनिच्छंती प्रत्याचष्टे सरमा एकादश अथ
ऋषिर्देवतविशागायक्षथां कथयति कथावैवं पुरा खलु बृहस्पतेरिंद्रपुरोहितस्य गावो बलात्करम्भु कुटीतैरैः पणिनामकासुरैर्हृता
बलपुरं प्राप्य गुहस्थाने स्थापिता असन् अथ बृहस्पते प्रेरितेनेंद्रेण नष्टान्वेषणं ज्ञात्वा सरमा देवशुनी प्रेरिता बभूव आगस्त्यकृतरस
मी पिरमा स्वा महानदीमुत्तीर्य बलं पुरं प्राप्य सर्वप्रविदित्य गुहस्थाने नागाः ददर्शेति तत्र पणिनामासिरसंरे बृहस्पतिगृहागस्य नि
गूढा बलपुरेगुहाः स्थापिता गा अन्वेष्टुं अन्वेषितुं निश्चमहल्लुं भगिनि विकल्पः प्रायाइंद्रेण प्रहितां सरमां देवशुनी जागतीयाव इदेवताम्
गादेव तादिष्टिं इंद्रस्य साधनयुतां अस्युसकृत्य अयुग्भिकृग्भिः पंचभिः पणयोमिथ्यंतः देवभूत्या सह मित्रत्व मात्मनइच्छंतः मित्रा
च्छवेति ईनंशानरिजसिरूपं प्रणवपूर्वं प्रणवपूर्वकमूचुः उक्तवंतश्चक उक्तवंतः साचदेवशुनी तां युग्माभिः द्वितीयाचतुर्थ्याद्याभिः
एकादश्या चेति षड्भिः प्रत्याचष्टे त्रिष्टुप् पण्युक्तो सरमादेवतं तयुक्तो पणयस्तथा नेवदत्ताघ्न शुद्धुं ब्रह्म जाया ब्राह्म्यो वार्ध्व नवोभ्यावे
श्वं देवं ब्रह्मनुष्टुबंतं प्रथमाः ब्रह्मणो जाया जुहूर्नाम ऋषिका ऊर्ध्वनभा नाम ब्रह्मपुत्रः अनुक्ते रिंद्रः द्वा वनुष्टुभा वंते यस्यतत् तथा द्या
पंच त्रिष्टुभः समिध्य एकादश जमदग्निर्वक्तो वारामः आप्रियः अथ अद्य जमदग्निर्नामभार्गवः तस्य जमदग्नेः पुत्रो रामो नाम यः
परशुराम इति ख्यातः आप्रीसूक्तमिदं आप्रमित्युक्ते स्तनूनपात् द्वितीयं एकादशापि त्रिष्टुभः अथो नरसूक्तदर्शिनामृषीणां चतु
र्णां गोत्रमाह पुरः चत्वारो वैरूपाः अत्र ऋषयः परे चत्वारः ऋषयो गोत्रभृतो वैरूपा वेदितव्याः लाघवार्थमिदं प्रत्युपि विरूक्ते रिदं
हि लघुना न हि प्राग्वर्मा वैरूपा एवास्तु प्राक् प्रत्यक्ताण्व इति वत् किं परे चत्वार इति न हि अनुक्रमण्य तु कारणं मनीषिणो दशाष्टादश

मपरध्वं अष्टादंष्ट्रो नामवैरूपः त्रिष्टुबिंद्रः इंद्रपिबतमप्रलिदनः दश प्रतिकामं प्रभेदनो नामवैरूपस्त्रिष्टुबिंद्रः नमस्यद्वार प्रभिदनो वा त्रिष्टुप् दश द्यावापृथिवी शारप्रभेदनो नामवैरूपः त्रिष्टुभं यस्मतत् नवादितो नवजगत्यः घर्मासद्भिः तापसो वा घर्मो वैश्वदेवं चतुर्थ्या जगती दश समंतासग्निर्नामवैरूपः अथवा घर्मो नामतपसः सुतः वैश्वदेवं च तुर्थी जगती शिष्टानव त्रिष्टुभ इंद्रः चित्रइन्न वत्रार्षि हव्य उपस्कृत आग्नेयं आगतं त्रिष्टुपुद्दश कर्मैतं शिशो उपस्तुतो नाम वृष्टिहव्यपुत्रः इतिलावृष्टि हव्यस्य पुत्रा उपस्तुता सत्र वत्रार्षि हव्य उपस्कृत आग्नेयं आगतं त्रिष्टुप् ... षयो वो वत् इतिबहुवचनं पूजार्थमिति तं मन्यते उपयमनं चैत् अ षोनुक्रमण्यामपि तथैव दर्शनात् उपस्तुतो वार्षिहव्योन वत्रूक्रि
त्र इच्छि शारिति आग्नेयमिदं ऊर्जोनपादित्यष्टमी त्रिष्टुप् इतिलाग्निरत्यंतानवमी शाक्करी वांतेयस्यतत् आदितः सप्त जगत्यः पि
बस्यां रागिनयुतोग्नियूपो वा नव स्थिरोस्थूरनाम्न पुत्रः अग्निर्युतो नाम अंथे वास्थिरो रएव अग्नियूपो नामत्रिष्टुबिंद्रः नवाइमिखुध
नाभंदान प्रशासा वा चैनगत्यानव देवाः शिशुर्नामांगिरसाः वनस्यां भास्य च दानं मकर्षेण दानतिदानपूर्वकः प्रशंसस्कृतवान्
अयत्व आपेपभमा द्वितीयि जगती अथ शिष्टास प्तत्रिष्टुभः अग्ने हंस्युरुक्षय आमहियव आग्नेयं राक्षोघ्नं गायत्रं तु नव त्यत्रि
णं उरुक्षयो नाम आमहीयुवः आमहीयुवगोत्रजः रक्षसो हंत्वग्नेर्गुणः गायत्रीमिदमुत्तरंच श्रूयते हि अथयदि नजायते य
दिविरंजायेन राक्षोघ्नो गायत्र्या नूत्याग्ने हंसि न्यत्रिणमिति इतिवेसप्तोनेंद्रो लव आत्मानं तुष्टाव इतिमे त्रयोदश इंद्रस्यायमि
त्यिंद्रः मत्वीकृतत्वात् लव आत्मन स्वयमेव स्कुतवान् इंद्रो हि लवरूपमास्थाय सोम ऋषिषत्संपिबन दृष्टः ऋषिभिर्दृष्टः स
नू सोमस्याति प्रियत्वं च वै भवं स्वं वर्णयन् आत्मानमनेन सूक्तेनस्तुतवानिति ती तिहासविद आहुः इतिवलव मेंद्रतनः कायमिति
देवता अनुक्रमणी संगच्छते इतिवैलवमेंद्र तदिति बृहद्देवता वत्यारुभयोर्लवस्त्वेंद्रः इतिवाइतिमे मनइत्यार्षानुक्रमणी ६
अध्यायः तद्दिन वा थर्वणो बृहद्दिवः आस बृहद्दिवो नामाथर्वपुत्रः त्रिष्टुबिंद्रः हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कौ
यं समवर्तत हिरण्यगर्भो नाम प्रजापतिपुत्रः कायं कदेवत्यं कोदेवतायस्यतत् कस्यदितस्येनेनाणु इदंतादेशः वक्ष्या यादेशो हि
रण्यगर्भः समवर्तताग्र इतिषट् प्राजापत्याः इति सूत्रं तु प्राजापत्य इत्यादय: प्रजापते न त्वदेतान्यन्य इतिचतु कायत्वापवादः
अतएव कथानश्चित्र आभुवस्थिरण्यगर्भः समवर्तताग्र इतिके चिद्देवत्यो नियुक्तं मनसा वा प्राजापत्ययाचेति ब्राह्मणं तु सुक्ते ६२

र्निदृष्ट कृपिंत्वथ नासानेदिष्ठवदृषिणा निर्देशः दशापि त्रिष्टुभः वसुनाष्टो वित्रमहावासिष्ठ आग्नेयं आगतमा द्यापं चम्या चैते वित्र
महस्रं चित्रमहा नाम वसिष्ठपुत्रः जगती छंदस्कमाग्नेयं आद्या पंचमी त्रिष्टुभौ अमंवेनो वेनोवेन्यं चोदयत् अंत्यो वेनो नामभार्ग
वः वेनो भार्गव इत्युक्तं वेन्यं वेनदेवत्यं त्रिष्टुप् इमन्नानं वैद्रोनिहवोग्निवरुणसोमानामाद्याग्नेयी तितिस्रश्चाग्नेरात्मस्तवः शिष्टाय
थानिपातं सप्तमी जगती नव नवर्चं इंद्रोक्तनिहवः परस्पराह्वानमिंद्रादीनां संवाद इति अत्र सूक्तस्याद्याग्नि देवसाय अदेवाद्देव इति
तिसृभिश्चाग्निरात्मानमेव तुष्टाव शिष्टा ऋचो यथानिपातं यत्रोपनिपतितादेवैव इदं स्वरित्यस्यां सोमस्तुतः नवम्यां त्रिभिः पादै
र्निर्माया: कविः कवि त्वेतिचहृदएताश्च तस्रो वरुणः नवम्याश्चतुर्थपादे इंद्रदेवत्यः अग्नेउत्तरोनवमीद्रदैवत्या अंतेत्यनुक्तेश्चा सार्था
अग्निवरुणसोमानां स्तुतस्तुतिः कर्तरिषष्ठीहृत्त्र स्पर्धायां सहेनच हृः संप्रसारणं चन्यस्युपविष्टिस्तत्र तत्राद्याग्निदेवत्या अ
थतिस्रोग्नेरात्मस्तवः आत्माग्नि रेवऋषिः देवतेत्यर्थः शिष्टा यथानिपातं योयत्रस्तूयते न निपतेतिसतत्रस्तुत्य इत्यर्थः आ
द्यापंचम्यादिपंचेति षट्संख्यायापवद्यत् तत्वग्निन्वस्याग्निवरुणसोमाः सप्तमी जगती शिष्टा त्रिष्टुभः अहं रुद्रेभिर्वा अष्टगाभि
णीतुष्टाव आत्मानं द्वितीया जगती रुद्रेभिः वाकु नाम आंभृणी अंभृणस्य महर्षेः पुत्री आत्मानं तुष्टाव स्वयमस्य ऋषिका देवते
त्यर्थः द्वितीया जगती आद्या तृतीयाद्याश्चेति सप्त त्रिष्टुभः नत्तं शो लूषिः कुल्मलबर्हिषो वामदेव्यो वांसुर्वैश्वदेवसु परिष्टाद्बार्हत
मंत्या त्रिष्टुप् अंहः अंत्यो कुल्मलबर्हिषो नामशैलूषपुत्रः वत्वादित्वादित्र अथवा अंहोमुक् वामदेवपुत्रः उपरिष्टाद्बृहत्या
ख्यत्र कथं दशाक वत्या व्याप्तमिदं उत्तरपदवृद्धिश्छांदसी अष्टमी त्रिष्टुप् विश्वेदेवाः रात्रिः कुशिकः सोभरिरात्रिर्वा भारद्वाजी
रात्रिस्तवा गायत्रं व्यरव्यत् अंत्यो कुशिको नाम सोभरिपुत्रः अथवा रात्रिर्नाम भारद्वाजपुत्री ऋषिका रात्रिस्तवं रात्रिदेवताया
स्तुतिर्यस्मिन्सूक्ते अष्टावपिगायत्र्यः नमाग्निनवचीतह व्यो वैश्वदेवं जगत्यंतं वर्चः विहव्यो नामांगिरसः अंत्या जगती आदि
तो द्वे त्रिभिः सू विश्वेदेवाः नासत्सप्त प्रजापतिः परमेष्ठी नासवसन्नेतु आसीत् प्रजापतिर्नाम परमेष्ठी गुणविशिष्टः विशेषणं
च वाच्यत्वं वैश्वामित्रत्वस्य प्रजापतेर्मा भूत् अथवा कश्चित्कथंचित्न्यायेन प्रसज्येत सप्रजापति गोत्रे पसुपदे शोच्यनुक्तिः स्मा
वद्धनं भावानां पदार्थानां वृत्तिः सृष्ट्यादिवृत्तिर्यस्य देवता तत् भाववृत्तीयमिति प्रातेत्वस्यार्थत्वादिदमेवमिदमुत्तरं च योयज्ञः

225
1916

स०भा०
६३

प्राजापत्यो जगत्यादि विश्वन: सप्त यक्ष्मीनामप्रजापतिसुत: आद्याजगती अथषड्त्रिष्टुभ: भावइत्वं देवता अपप्राच: स्फकीर्तिः काक्षीव
तोमध्या नुष्टुप् सोनराघ्नाम्विन्यो इंद्र सप्त स्फकीर्तिनामक्षीवतपुत्र: मध्येयाचतुर्थ्यनुष्टुप्साच तुर्थ्यउत्तरा पंचमीद्वे चाश्विदेव
त्ये आदित उत्तरस्येषड्तिनिष्टुभ: चतुर्थ्यपंचमीच अजमिंद्र: ईजानं शाकपूतो नार्मेधो मैत्रावरुणं न्यंकुसारिण्या यालिंगोक्त देवतात्याम
हासतो हत्सुपाद्यो पांत्येप कीशापाविराडूरूपा: इत्र सप्त शाकपूतो नामनृमेधपुत्र: मैत्रावरुणदेवत्यं आद्यालिंगोक्त देवताघूर्भुम्य
श्विदेवसेस्यर्थ: अंत्रवाद्यान्यंकुसारिणी द्वितीयश्चेन्यंकुसारिणीसुक्ते अंत्यासप्तमीमहासतो बृहती द्विद्वादशान्यष्टकवती उपाद्यो
पांत्येद्वितीयापष्ठीच प्रस्तारपंक्ती द्विद्वादशाष्टकवती तृतीया चतुर्थ्यपंचमीतिस्रोविराडूरूपा: एकादशिनस्त्रयोष्टकस्त्वविर
डूपाप्रोशुस्कद्योपेजवन: शाकरंमहापंक्तीनतोत्रिष्टुबंतं सप्त असमिस्कदानामपिजवनाख्यराजपुत्र: आद्यन्तृच: षट्पंचाशदक्ष
रपांशकर्यो चाप: द्वितीय: षकष्टकयामहापंक्त्याद्याप्त: सप्तमीत्रिष्टुप् अंत्योक्तिश्चित्यप्रयोजना इंद्र: उसेयन्मांधातायौवना
श्वोमहापंक्तंपंक्तिरंत्यानामध्यस्योगोधापश्यत् सप्त इंद्र मांधातानामराजयुवनाश्वपुत्र: षडष्टकयामहापंक्त्याद्यासमिदं
अंत्यासप्तमीपंक्ति: नामध्यर्द्धापथ्यादि द्वितीयार्धर्चयुकांगोधाप्रश्नवादिनीभपश्यत् इंद्र: यस्मिन्कुमारो यामायनोयाम्मानुष्टु
भंहि सप्त हृस्ते कुमारोनामायमगोत्र: नडादित्वानुक्त् यामयमदेवत्यं अनुष्टुप्छंदस्कमिद्मुत्तरंच केशीमुनयोवातरशनाजूति
वति जूतिर्विप्रजूतिर्वृषाणक: करिकृतएतशऋष्यशृंगश्चेकर्यो: केशिनं सप्त अग्निं मुनयोवात्वंयमा: वातरशना: वातरशनाद्द
ष्यष्य एतेचैकर्चो: क्रमेणएकैकस्या: कवोद्रष्टार: तेकेइत्यत आह जूतिर्वातजूतिर्विप्रजूतिर्वृषाणकरिकृतएतशऋष्यशृंग
श्वेतिकेशिनं अग्निसूर्यवायुदेवत्यमिदं अग्नि: सूर्योवायुश्चकेशिनइत्युक्तं अनुष्टुप् उतदेवा:सप्तऋषय: एकर्चावैश्वदे
वं सप्त अवद्दितं भरद्वाज: कश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठउक्ता: एतेवर्गोत्रवाहंस्यत्समारीचराहुगणभोम
गाथिभार्गवमैत्रावरुणाएतेप्येक र्चा: अनुष्टुप्विश्वेदेवा: नवस्येषकंगऔरवोजागतं इंद्र: अंगोनामउरुपुत्र: षड्पिजगत्य:
अनादेशादिंद्र: सूर्यरश्मिर्देवगंधर्वोविश्वावसुरात्मानमस्तौत् पूर्वार्धसवितारं षड् हरिकेश: विश्वावसुर्नामएषवर्ण: देवानां ६३
गंधर्व: गायकत्वेनदेवानांसबंधीजातिगंधर्वइत्य र्थ: पूर्वार्धेनसूक्तस्याद्येन तृचेनेतिसवितारंस्तुतवान् उत्तरेणार्धेनात्मा

227
1916

नमस्तौत् त्रिष्टुप् अग्नेतवाग्नि: पावक आग्नेयमाद्याविष्टारपंक्ति: तिस्रो सतोबृहत्यउपरिष्टाज्ज्योति: षड् श्रव: अग्नि: पावक ऋषि:
अस्याग्निदेवत्यं आद्या विष्टारपंक्ति: अष्टकद्विद्वादशाष्टकवती अथतिस्र: सतोबृहत्य: तृतीया चतुर्थ्यपंचमीसतोबृहत्य:
षष्ठीउपरिष्टाज्ज्योति: द्वादशिनस्त्रयोष्टकवती अंत्यानुक्तेत्रिष्टुप् अग्नेअच्छाग्निस्तापसोवैश्वदेवं हिमानुष्टुभंहि षड् षट्
अग्निस्तापसगुण ऋषि: आनुष्टुभमिदमुत्तरंचेदौवैश्वदेवं यमस्तोहृता: सारंगा जरिताद्रोण: सारिसृक्वस्तंबमित्रश्चा
ग्नेयमाद्येजगत्योचतस्रस्त्रिष्टुभ: अग्नेसार्ड्ग इति जानित: सांगइति पक्षिविशेषस्याख्यातेचत्वारहृत्वाश्च क्रमेणप्रत्येकंद्वृचदृशि
न: तेषांआद्योजरितानामद्वितीयोद्रोण: तृतीय: सारिसृक्व: चतुर्थ: स्तंबमित्र: आद्येजगत्यो आद्याद्वितीयेच जगत्यो अथचत
स्रस्त्रिष्टुभ: अधिकारादनुष्टुप्त्वंस्तंबमित्र इत्वंगत: अग्निदेवत्ये ८ ७ त्यंषट्सांख्यात्रिराश्विनं विद्त्रिं अत्रिर्नामसांख्यस्याप
त्यं सोमंतापवाद: अत्रिरन्योत्यन्त्यं सोमाद्युपदेशाद्युदर्शनात् अधिकारादनुष्टुप्त्वं आश्विनोचात्रदेवता अयंहिताक्ष्यपुत्र:सु
पर्णोयामायनोवोर्ध्वकृशनोवागायत्री बृहती गायत्र्यो सतो बृहती विष्टारपंक्ति: षड् तेसुपर्णो नाम ताक्ष्यपुत्र: अथवा ऊर्ध्वकृ
शनोनामयामायन: अत्रवाद्यागायत्री द्वितीयाबृहती तृतीयाचतुर्थ्योंचगायत्र्यो पंचमी सतो बृहती षष्ठी विष्टारपंक्ति: अष्ट
कद्विद्वादशाष्टकवती इंद्र: इमामिंद्राण्युपनिषत् सपत्नीबाधमानुष्टुभंतुपंक्त्यंतं षड् खनामि इंद्राणिऋषिका उपनिषत्संज्ञ
कमिदं सपत्नीबाधनंच सपत्नीबाध्यतेतेनस्तेनेहउपादिना तेनास्यतुदेवदेवता आनुष्टुभमिदमुत्तरंच उपतेधामितिष
ष्ठीपंक्ति: पंचकाष्टका आरण्यान्येरंमदोदेवमुनिररण्यानीतुष्टाव षट् अरण्यानि देवमुनिर्नामइरंमदपुत्र: अरण्यानी
महारण्यां अतिमानिर्नादेवतांतुष्टाव हिमारण्ययोर्महत्वइतिङीप् आनुष्टुभं श्रत्तेपंचस्कवेदा: शैरिषिस्त्रिष्टुबंतं धौर्देमि
स्कवेदानामशैरीषपुत्र: बाह्वादित्वादित्र् पंचमीत्रिष्टुप् आद्येचतस्रोजगत्य: इंद्र: सुषाणास: पृथुर्वैन्य: पंच इंद्रपृथुर्नामवे
नपुत्र: अण् यञ् त्रिष्टुबिंद्र: सविनार्चिनोहैरण्य: स्तूप: सावित्रं यंत्रै: पंच अर्चिनो नामहिरण्यस्तूप: पुत्र: सवित्रदेवत्यं
त्रिष्टुप् समित्सोमश्चीकोवासिष्ठ: आग्नेयं बार्हतमंत्याउपरिष्टाज्ज्योषीजगत्युपांत्याद्या पंच वित् मृळीको नामवसिष्ठपुत्र:

सं०भा० ६४

आग्नेयं षळं दसावार्हतं अंत्ये चतुर्थ्यु पंचम्यो उपरिष्टाज्ज्योतिषी निहार्दशाष्टकयो उपांत्या चतुर्थ्य जगती वा अस्थया अस्था काम
यिनी अस्थमानुष्टुभं तु पंच अग्निः अस्थानामऋषिकासाचकामायिनी कामशब्दात् नडादित्वात् फक् आतिङीषु गोत्रं चचर
णीः सहेति आतितं अस्थ अस्था देवत्यं आनुष्टुभमिदमुत्तरं च शासः शासो भारद्वाजः पंच इत्था शासो नाम भारद्वाजपुत्रः अनुष्टुब्
इः इं स्वयं नाद्वै वज्ञामय इद्रमा नरो गायत्री पंच अपस्तुवः देवजा मयः देवानां स्वस्वभूताः इइमा नरो नाम ऋषिका पंचापि गायत्र्य
स्यः इंद्रः सोमीय मभिभावहन्तमानुष्टुभं तु पंच एकेभ्यः यमी नाम ऋषिका भावहन्तमानुष्टुभमिदमुत्तरं च अरायशिरिंबिठो
भारद्वाजो लक्ष्मीघ्नं द्वितीयातृतीये ब्रह्मणस्पत्ये अंत्या वैश्वदेवी पंच काणे शिरिंबिठो नाम भारद्वाजपुत्रः अलक्ष्मीघ्नं अश्री
नाशकरं सूक्तं जपहोमादिभिस्त्विदं नश्रीयीपां सयीरश्रीनाशात्वप्रकीर्तितं द्वितीयातृतीय ब्रह्मणस्पत्ये ब्रह्मणस्पतिदे
वत्ये इउपास्ये इति किं नो कमिति चेन्नूष्ठं तं मुनिं पंचमी वैश्वदेवी पंचाप्येता अनुष्टुभः अग्निं आग्नेयं तु राग्नेयगायत्रं पंच हि
न्वं तु केतुर्नामाग्निपुत्रः सर्वमाग्निक लिभ्यामिति ढक् आग्नेयं सूक्तं गायत्रं इमानु भुवन आप्त्यः साधनो वा सौवनो वैश्वदेवं त्रैष्टु
भं विराडादि पंच भुवना म्कवनो नामाप्त्यपुत्रः अथवा भुवनपुत्रः साधनसंज्ञः वैश्वदेवं द्विपदया भिंव्या मं द्वैपदं वि शात्यक्षरा वि
राजमाभूदिति त्रैष्टुभमिसूक्तं श्रूयते हि इमानु कं भुवना सीषधामेति द्विपदाः शंसतीति सूर्योनश्चक्षुः सौर्यः सौर्यं गायत्रं पंच
दिवः चक्षुर्नाम सूर्यः पुत्रः सौर्य इति मानवनिवत्यर्थं रवचक्षुर्नाम इति सूक्तं सूर्यदेवत्यं पंचापि गायत्र्यः उदसौ षट् पौलोमी शा
च्यात्मानं तुष्टावानुष्टुभं सूर्यः पुलोमतनया शची नामेंद्रस्य महिषी कृकाभूत्वा स्वयमात्मानमेव स्तौति षळप्यनुष्टुभः तीव्रस्य
पंच पूरणो वैश्वामित्रः अतिय वसः पूरणो नाम विश्वामित्रः पुत्रः त्रिष्टुबिंद्रः मुंचामि त्वा प्राजापत्यो यक्ष्मनाशनो राजयक्ष्मघ्न
मंत्यानुष्टुप् पंच हविषा यक्ष्मनाशनो नाम प्रजापतिः पुत्रः राजयक्ष्मघ्नमिदं राजयक्ष्मक्षयव्याधिः राजयक्ष्मेति सर्वव्याधि
प्रशमनं गृह्यसूत्ये अथ व्याधितस्यातुरस्यप्रक्ष्मगृहीतस्य वा पुनः इति श्रूयते मुंचामि त्वा हविषा जीवनाय कमिति तेनेति
अनादेशादिंद्रो देवता आनुष्टुभं बृहद्देवतायां विकल्पः ऐंद्राग्नं मन्यंते यास्यु रेकैलिंगोक्तदेवतमिति नैनदस्ति अन्येषां तु मतमु
क्तं स्वयं शौनकस्यैंद्रः एतेष्टइत्ययमादेशादैंद्रत्वमेवानेनाशीह नः चतस्रस्त्रिष्टुभस्त्वाद्यो अनुष्टुप्पंचमी मित्रा ब्रह्मणा पट् ६४

229/1916

ब्राह्मणाद्रक्षोहा गर्भसंस्रावे प्रायश्चित्तमानुष्टुभं हि अग्निः रक्षोहा नाम ब्रह्मपुत्रः गर्भसंस्रावे गर्भस्य निहितस्य स्रावे पातविषय प्रा
येते तस्य प्रायश्चित्तं समाधायकं गर्भः समाधानमंत्रदेवता आनुष्टुभमिदमुत्तरं च द्वे अक्षीभ्यां विवृहा काश्यपो यक्ष्मघ्नं षट् ते विवृ
हा नाम काश्यपगोत्रः यक्ष्मघ्नं यक्ष्मा क्षयरोगः तस्य नाशनमस्य वाच्यं अपेहि पंच प्रचेता दुःस्वप्नघ्नं पंक्त्यंतं त्रिष्टुम्मध्यं मनसः प्रचेता
नामांगिरसः आदितो द्वे चतुर्थी चानुष्टुभः तृतीया त्रिष्टुप् पंचमी पंक्तिः दुःस्वप्नघ्नमिति फले यूपचारेणोक्तं दुःस्वप्ननाशनमिदं सूक्तं दे
वा नैर्ऋतः कपोतः कपोतो नाम हतो प्रायश्चित्तमिदं वैश्वदेवं पंच कपोतः कपोतो नाम निर्ऋतिपुत्रः कपोतेन गृहादेरुपहते भिक्षवे सति
जपहोमाभ्यां प्रायश्चित्तमिदं तादर्थ्यात् आयुर्घृतमितिवत् यथा गृह्ये हि सूत्र्यते कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः क
पोत इति प्रत्यृचं जुहुयाज्जपेद्वा देवतानु विश्वे देवाः त्रिष्टुप् ऋषभमृषभो वैराजः शाक्वरो वा सपत्नघ्नमानुष्टुभं महापंक्त्यंतं ऋषभो नाम
वैराजनामगोत्रतः शाक्वरो वा अत्र वाणुप्रकृतिस्त विराट् वैराजं शाक्वरं वा नाम पित्रोरन्यापि सपत्नघ्नं शत्रुनाशनेन मंत्रे
नोच्यते आदौ चतस्रोनुष्टुभः योगक्षेममिति षळ्कका महापंक्तिरंते यस्य तत् तुभ्येदं चतुष्कं विश्वामित्रजमदग्नी आगतं तृतीयालि
गोक्तदेवता वा इंद्र चतुष्कं चमिदं विश्वामित्रजमदग्नी सहाप्रश्यतां गोत्रं च गाथिन भार्गवावित्युक्तं आगतमैंद्रं तृतीया सोमस्य राज इत्ये
षा वरुणविधातृसोमबृहस्पत्यनुमतिदेवतेत्यर्थः ऐंद्री वा वानुस्याति औंद्री वायव्यं चतुष्कं नु अनिलो नाम वातगोत्रः वातात्
नडादिभ्य इति फक् वायव्यमिदं त्रिष्टुप् मयोभूः शबरः काक्षीवतो गव्यं चतुष्कं वातः शबरो नाम कक्षीवगोत्रः गव्यं गोदेवत्यं त्रिष्टुप् वि
भ्राड्बृहत् विभ्राट् सौर्यः सौर्यं जगतं प्रस्तारपंक्त्यंतं चतुष्कं बृहत् विभ्राड् नाम सूर्यपुत्रः सूर्यदेवत्यं आद्यो तिस्रो जगत्यः चतुर्थी आस्तारपं
क्तिः कद्वितीयो द्वेरुवत्यं त्वे पश्यतनु त्वमिदो भार्गवो गायत्रं चतुष्कं इटतः इटो नाम भृगुपुत्रः गायत्रमिंद्रः आ याहि संवर्तो
पस्त्यं द्विपदं चतुष्कं नवमा संवर्तो नामांगिरसः अनादेशान् श्रूयते संवर्त आंगिरसो मारुतमाविक्षितमभिषिषेचेति उषो देवत्यं द्वि
पदं विंशिका द्विपदा विराजः आ याहि वनसा सहेति द्विपदाः शंसतीति सूत्र्यते आयाहि वनसे मानुकं बभ्रुके र कद्दति द्विपदा सूक्तानि
आ त्वा पट् ध्रुवो राजस्तुतिस्त्वानुष्टुभं तु आ हार्षं ध्रुवो नामांगिरसः राजस्तुतिरिदमुत्तरं च राज्ञोभिषिक्तायैद्दे सक्ते आसिमं त्रणेद्य
ति आनुष्टुभमिदमुत्तरं च अभीवर्तेन पंचाभीवर्तः हविषा अभीवर्तो नामांगिरसः अनुष्टुप् राजस्तुतिः प्रव्रश्वतुष्कमूर्ध्वग्रा
वार्बुदिर्नाग्रावाणो स्तौ जगत्यं ग्रावाणः ऊर्ध्वग्रावा नाम अर्बुदः सर्पऋषिपुत्रः अनड्डोपवादः बाह्लादिसू राजाशासः ग्रावा

पं स्तुनवान् गायत्रं प्रस्तनवः सनुरार्षब आग्नयमानुष्टुप्स द्वितीयागायत्र्याद्यार्मवी चतुष्कं ऋभूणां सूनुर्नाम ऋभुपुत्रः आग्निदेवत्यं
आद्याऋभुदेवत्या द्वितीयागायत्रीतिस्रोनुष्टुभः पतंगं तृचं पतंगः प्राजापत्यो मायाभेदं जगदादि अर्कं तृचं पतंगोनाम प्रजापति
पुत्रः आदौ जगतीयस्य ननु द्वितीयातृतीयाद्वित्रिष्टुभौ मायानांमेदोयश्चेति कंठे काळादिवत् व्यधिकरणे बहुव्रीहिः त्यमूषु अरिष्टने
मितार्क्ष्यं तार्क्ष्ये तृचं वाजिनं अरिष्टनेमि तार्क्ष्यपुत्रः तार्क्ष्यादिघृणं तार्क्ष्यदेवत्यं तार्क्ष्यादित्वंश्रूयतेहि त्यमूषु वाजिनं जूतमिति तार्क्ष्या
स्युतः इति तिस्रोपित्रिष्टुभः मुनिष्टंके कर्त्ताः शिबिरौशीनरः काशिराजः प्रतर्दनो रौहिदश्वो वसुमना आद्यानुष्टुप् तृचं अव उशी
नरस्यपुत्रः शिबिर्नामराजा काशिराजः प्रतर्दनोनाम रुहिदश्वस्य पुत्रो वसुमनानामैंद्रयः राजानः एककर्त्तृः एकैकस्याऋचः क्रमे
ण द्रष्टारः अथाद्यानुष्टुप् अथद्वे त्रिष्टुभौ इंद्रः २ प्रससाहिषे अयऐंद्रः तृचं पुरुहूत जयोनाम इंद्रपुत्रः नहींद्र ऋषिः ननु संवादे इं
द्रादिति वामदेवानां इंद्रागस्त्ययोः संवादः इंद्राण्या इन्द्र समृदिरइतिदर्शनात् ऋषिरेव इंद्र इति चेत् बाहुल्यादित्यादिना त्रिष्टुबिंद्रः
प्रथस्येकर्त्ताः प्रथोवासिष्ठः सप्रथोभारद्वाजो घर्मः सौर्यो वैश्वदेवं तृचं यस्य अस्य ऋचय एककर्त्ताः क्रमात् प्रथसप्रथघर्माः तेवसि
ष्ठभरद्वाजसूर्यपुत्राः क्रमात् विश्वेदेवाः तिस्रोनुष्टुभः बृहस्पतिस्तपुर्मूर्धा बार्हस्पत्यं तृचं नयतु तपुर्मूर्धा बृहस्पतिपुत्रः अ
यान्तृचं ऋचमनुक्रमेण प्रत्यृचमित्यर्थः ऋक्पूर्विस्यैकारः यजमानस्य पत्नी होतुश्चाशिषः तथावसूक्तं अपत्यं त्वेतेतस्याद्य
या यजमानमीक्षते द्वितीययापत्नी तृतीययात्मानं इदं होतुर्हीदं विधानं त्रिष्टुप् विष्णुस्त्वष्टा गर्भ कर्ता विष्णुर्वा प्राजापत्यो
गर्भार्थाशीर्लिंगोक्तदेवतमानुष्टुभं तृचं योनिं गर्भाणां कर्तृभूतस्त्वष्टानाम ऋषिः तात्पर्यगोत्रमुपदेशात् अथवा प्रजाप
तिपुत्रो विष्णुर्नाम गर्भार्थाशी ऋषिः प्रार्थ्यते विष्णुश्च त्वष्टा प्रजापतिः सिनीवाली सरस्वती अश्विनौ इति लिंगोक्तदेवत
मिदं तिस्रोनुष्टुभः महि त्रयाणां धृतिर्वारुणिरादित्यं स्वस्त्ययनं गायत्रं वै तृचं त्र्यणां सत्यधृतिर्नाम वरुणपुत्रः वरुणात् बाहुल्या
दित्य ऋतु ऋषितादर्थइत्र निहवोग्निर्वरुणसोमा नामितिवरुणस्य ऋषित्वस्य दर्शितत्वात् आदित्यदेवत्यं यस्मैपुत्रासोअ
दितेरितिलिंगात् स्वस्त्ययनं अविनाशागमनसाधनं सूक्तमेतेहि त्वं महि त्रीणामनुमंत्रैवमितिस क्षेमकृतस्त्विद्ध
यं भवतीति विज्ञायत इति गायत्रमिदमुत्तराणि चत्वारि वातोवातायन उलोवायव्यं तृचं आवातु उलोनाम वातपुत्रः ६५

231
1916

वायुदेवत्यं गायत्रं प्राग्नये पंचाग्नियोवत्स आग्नेयं तु वानं वत्सोनाम अग्निपुत्रः अग्निदेवत्यमिदमुत्तरं च गायत्रं प्रनूनं तृचमाग्ने
यः इध्मो जातवेदस्यं जातवेदसं इध्मो नामाग्निपुत्रः जातवेदसं इत्यग्नेरधिकृतस्य गुणः गायत्रं आयंगौः सार्पराज्ञात्मदेवतं सौर्यं
वा तृचं पृश्निः सार्पराज्ञीनाम ऋषिका आत्मदैवत्यं सूर्यदैवत्यं वा यथा तिस्रोपि गायत्र्यः ऋतंमाधुच्छंदसोघमर्षणो भाववृत्तमा
नुष्टुभं तु तृचं त्वस्त्यं अघमर्षणो नाम मधुच्छंदसः पुत्रः भाववृत्तं दैवत्यं भाववृत्त उक्तार्थः आनुष्टुभमिदमुत्तरं च ससंचतुष्कं
संवननः संज्ञानमाद्याग्नेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुप् इत्युक्ते संवननो नामांगिरसः संज्ञानं तत्तोणु प्रथमाग्निदेवत्या अ
न्ये विश्वानीति लिंगात् आनुष्टुभमित्यानुष्टुभत्वे प्राप्ते विशेषमाह समानोमंत्र इति तृतीयात्रिष्टुप् छंदस्के त्यर्थः शिष्टास्तिस्रोनु
ष्टुभः तृतीयात्रिष्टुप् तृतीयात्रिष्टुप् इति द्विरुक्तिः शास्त्रसमाप्तिसमाप्तिसूचनार्थं यथा पाणिनीयांते अ अ इति तथा च परिपू
र्णं परिपूर्णमिति छंदोविविंसंते तथा वसूभांते प्रकृतिभाव इत्यादिनमः शौनकाय २ तथारण्यकांते ब्रह्मभवति २ गृह्यां
ते पशूनां मध्यमियात् मध्यमियात् एतेच ब्राह्मणा मृष्ट एवानुप्रकुर्वंतीति नन्नहि क्षिप्रेहे येनं स्तृणुते स्तृणुते ब्राह्मणारण्य
सूत्र निरुक्तेषु तु प्रत्यध्यायसमाप्तावपि द्विवचनं दृष्टं अथ ऋग्वेद इत्यादि तृतीया त्रिष्टुबंतकः इदं शास्त्रमधीयानः प्रण
वार्थतामियात् १ ऋषिछंदोदेवतादिविज्ञानं फलमुच्यते ऋषिर्नामार्षगोत्रज्ञ ऋषिसंस्थितिमित्ययत् एकैकस्य ऋषेर्नी
त्यामहस्राद्यानिधिर्भवेत् छंदसां चैवमालोक्य छंदोज्ञानादवाप्नुयात् ३ तस्यास्तस्या देवताया स्तद्भावत्वं प्रतीयते यां यां
विजानाति नरो देव मिष्टविनिर्णयः ४ किंच ऋष्यादिविज्ञानफलमनुभूय सुपूजितः स्वाध्यायस्यफलं पश्चात् श्रुत्वा
दत्तं प्रपद्यते ५ ज्ञानस्मरणसंयुक्तो जायते यदि जायते नष्टेनतज्ञानसूत्रेण सम्भवेवमहात्मना ६ उक्तमन्यस्य नैष्फ
ल्यं सर्वकर्मसु सर्वदा स्वयं हीनकोपि भवतीत्यत्र फलमाह ऋषेर्नामार्षगोत्रज्ञः ऋषिभ्यस्तु सदा नमः ऋषीणां विषय
अस्तु यः शरीरात्प्रमुच्यते सोतीत्य तमसः पारं स्वर्गलोके महीयते सहस्रयुगपर्यंतम् ह ब्राह्मणमुच्यते नाकपृष्ठे वसेत्का
ले दिविसूर्यैर्विराजते स्वाध्यायं मुनयोधाने मंत्रं देवन विष्णुतिः सततं मतिदिग्व सेत्स्वर्गे सतमाध्विरपीज्यत सर्वानुक्रमणी

सं०भा०
६६

यदेषा कात्यायनमुनेः कृतिः समाप्यैकाध्ययनेंकैः षट्सप्तत्रिकद्व्यष्टिका अस्या वृत्तिरियंचापि समाप्तासद्गुरोः कृतिः
वेदार्थदिपिकानामषड्गुरूणांप्रसादतः गणांत्सामेषमासेतिकिलस्तुस्थदिनहोगणेनेसति सर्वानुक्रमणीवृत्तिर्जात
वेदार्थदीपिका लक्षपंचदशापदैः पंचषष्ठिसहस्रकं सद्यात्रिंशाछतंचेतिदिनवाक्यार्थहारितः विनायकः शूलपा
णिः मुकुंदः सूर्यव्यासः षड्भ्यो नमामि तान् सर्वदापांतुमांते यैर्वैभक्तिः सप्तविद्याप्रदत्ता आद्यासर्वानुक्रमणीद्वि
तीयामहाव्रतचोपनिषद्द्वयंच महाव्रतंसूर्यमासां तृतीयंचत्वारिंशद्ब्राह्मणंवैचतुर्थं तद्दत्तमंपंचमीवैनिरुक्तंष
ष्ठीगृह्यंशाकलस्यसंहितासप्तममिति इमादत्ताः सप्तविद्यास्तकैसद्भिः येवैप्रभुभ्यो गुरुभ्यो नमोस्तुतेभ्यः इतिष
ड्गुरुशिष्येण कृतावेदार्थदीपिकासर्वानुक्रमणीवृत्तिः समाप्ता चात्मतुष्ट्यै इतिश्रीषड्गुरुशिष्यविरचितायां
सर्वानुक्रमण्यांवृत्तौ वेदार्थदीपिकायां प्रथमोध्यायः श्रीसीतारामचंद्रार्पणमस्तु शुभंभवतु

६६

233
1916

1184

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

34
1916

इतिसर्वानुक्रमभाष्यसमाप्तः ग्रंथ संख्या ३९५०